In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी ग्रन्थमाला - 81

वेमगीता

'प्रजाकवि' वेमनरचिततेलुगुपद्यानां

श्रीराममूर्ति-नृसिंहमूर्तिभ्यां कृतः संस्कृतानुवादः



संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः, हैदराबाद्
2010

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला –81

वेमगीता

प्रजाकवि वेमनरचिततेलुगुपद्यानां
श्रीराममूर्ति–नृसिंहमूर्तिभ्यां कृतः संस्कृतानुवादः

संस्कृत अकाडमी निदेशकेन
श्रीनिवासवरखेडी इत्यनेन

सम्पादकपदविभूषितस्य
वि.श्रीनिवासशर्मणः

सहायकसंशोधकस्य श्रीमतः
के.वि.सूर्यप्रकाशस्य च सहकारेण

संशोध्य प्रकाशितः ग्रन्थोऽयम्

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः
हैदराबाद्
2010

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला – 81

वेमगीता "प्रजाकवि" वेमनरचिततेलुगुपद्यानां श्रीराममूर्ति–नृसिंहमूर्तिभ्यां कृतः संस्कृतानुवादः

ISBN – 978-93-80171-17-3

ग्रन्थोऽयं भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनस्य राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य द्रव्यानुदानेन प्रकाशितः।

प्रधानसम्पादकः – श्रीनिवासवरखेडी
निदेशकः

ग्रन्थप्रकाशनसंयोजकः – वि.सुब्रह्मण्यम्
उपनिदेशकः

सर्वेऽधिकाराः संस्कृतपरिषदायत्ताः

मूल्यम् – Rs. 100
$10

पुस्तकप्राप्तिस्थानम् – संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः
हैदराबाद्
Phone & Fax : 040-27070281
Email: sanskritacademyhyd@gmail.com

मुद्रणालयः – कर्षक् आर्ट् प्रिन्टर्स्

In Public domain. Digitization Muthulakshmi Research Academy
Sanskrit Academy Series- 81

Vemagītā

A Sanskrit Rendering of Vemana's Telugu Poetry

By Sri Rama Murthy and Narasimha Murthy

Edited by
Shrinivasa Varakhedi
Director

In association with
V. Srinivasa Sharma
Editor

With the assistance of
K.V. Surya Prakash
Research Assistant

SANSKRIT ACADEMY
(Adarsha Shodha Sanstha, Rashtriya Sanskrit Sansthan, New Delhi)
Osmania University
Hyderabad - 500 007
Phone & Fax 040-27070281
Email – sanskritacademyhyd@gmail.com

2010

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Series – 81

Vemagītā, A Sanskrit Rendering of Vemana's Telugu Poetry
By Sri Rama Murthy and Narasimha Murthy

ISBN – 978-93-80171-17-3

This publication has been brought out with the financial assistance of Rashtriya Sanskrit Sansthan, (Deemed University) Ministry of Human Resource Development Govt. of. India, New Delhi.

Publisher & General Editor: Dr. Shrinivasa Varakhedi
Director, Sanskrit Academy

Coordinator : Dr. V. Subrahmanyam
Dy. Director, Sanskrit Academy

© Sanskrit Academy.

Copies : 300

Price : Rs/-100
$ 10

Copies can be had from:
- Director
  Sanskrit Academy
  Adarsha Shodha Sansthan
  Osmania University Campus,
  Hyderabad – 500 007

Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
Web: osmania.ac.in\sanskritacademy

Printed at: Karshak Art Printers, Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

PREFACE

Noble teachings of Vemana in simple Telugu hyms are brought to Sanskrit Language in Anushtubh chandas, Long way back by scholars - Sri. G. Srinivasa murty and sri I.Naransah murty. Vemana's Telugu compositions find important place in everyday life, which were being used by every common man till recent days. Due to uncontrolled impact of modern education in system, Telugu language and its literature have become less important and are slowly disappearing from public notice. We must retain these immortal not teachings for our forthcoming generatious. That's why this publication is brought out.

The poet-sage, Vemana embodied his moral and philosophical teachings in simple verses, using the popular Telugu idiom of his day, for the enlightenment of the masses steeped in ignorance.

In the Telugu language "anna" (Brother) is a term of endearment. Thus Vemana has come to be affectionately called Vemanna or Vemana.

He was born at Kondavidu on the full-moon day of the month of Kartika in the year Nandana of the fourteenth century of the Christian era. His mother was Mallamamba. He was the third son of King Komaragiri Vema who ruled over the territory of Kondavidu from 1386 to 1396 A.D., and the youngest brother of King Ana Vema who succeeded his father in 1396 and held sway till 1424A.D. Tradition has it that Vemana was a co-disciple to the great poet, Bammera Potana under Soma Guru with whose aid he earned expertise in the literatures of Sanskrit and Telugu and that after enjoying princely pleasures for about twenty years and having seen the decline and fall of Reddi kingdoms he became disillusioned and having renounced all

In Public domain. Digitization Muthulakshmi Research Academy

material entanglements, lived a life of unblemished spirituality singing his mundane and spiritual experiences till he finally laid down his earthly body at the village of Katarupalli at the age of sixty eight years on the twenty fourth day of the month of chitra in the year Sarvari.

HIS LITERATURE AND ITS EXTENT

In Telugu the words 'Reddi' and 'Kapu' mean the same as the Sanskrit words 'Raaj' and 'Palak' (Ruler and Protector). From the suffix of Bhupala associated with the names of Vema and Krishna Rama as Vema Bhupala and Krishna Rama Bhupala, it is evident that the names of the members of the ruling dynasty of Kondavidu to which our Vemana belonged were suffixed, as a matter of course, with the honorific term, Bhupala.

Peda Komati Vemana, the author of the Sanskrit commentary called Sringara Deepika on the 'Amaruku Kavyam', and of the 'Sapta Sati Saram', commentary on the Gadha Sapta Sati came from Vemana's family.Vamana Bhat the reputed author of the Sanskrit drama, "Parvateeparinayam", popularized the life-story of Peda Komati Vemana through his work , called Vemabhupaleeyam. Kumaragiri Bhupala wrote in Sanskrit the well-known Vasantarajeeyam. Kumaragiri's son-in-law, Kataya Vema is the author of Sanskrit commentaries on the dramas of Kalidasa. The ruling Reddi family of Kondavidu was thus resplendent with renowned scholars and reputed poets. It was owing to the cultural eminence of this family that the court of Kondavidu held an attraction to such a great Andhra poets like Erra Pragadda and Srinatha. These facts prove indisputably that Vemana, himself was a scholar of Telugu and Sanskrit.

The Telugu metrical form called "Ataveladi" helped Vemana to bring out his profound thoughts with natural ease

In Public domain. Digitization Muthulakshmi Research Academy

and elegance as the *Anustup* metre provided a means of straight and unhindered expression to Sanskrit poets. He enshrined the most intricate and abstruse metaphysical ideas of the various Upanishads and other philosophical treatises in the simple and popular spoken idiom of his day. His skill in the art of employing simple but meaningful expressions excites the admiration of scholars. No doubt in his writings we meet here and there with high sounding Sanskrit words and phrases as *Manineemanoja mandiranandykaloludu* (reveling in thoughts and acts of unbridled concupiscence), *Urdhvaloka sukhamu* (the happiness of heavenly life) *Abhijatvamadamu* (pride of blue blood) and Viswadabhirama,(Beloved of the Universal Benefactor) so Nevertheless his Telugu style is very simple as the Sanskrit diction of the Bhagvadgita. There are also a few examples of intricate rhyming which the writers on poetics usually refer to such as the rhyming of *jna* with *mka* of *A* with *Prana* and of *Rigyazu* with *Yogya*. While the rest of the Telugu writers hold *geemu* as the Telugu derivation of the Sanskrit words *griha* and *geha,* Vemana spells it as *guramu*. These peculiarities come prominently to the notice of the readers throughout his writings.

However, the questions of Vemana's descent and locale or the peculiarities of his poetic diction are not of primary interest to us. Our object of enjoyment is the priceless wisdom clothed in his verses. He was not a poet by profession. His songs burst forth from the depth of his soul under a natural impulse dynamised by unusual and insufferable circumstances. The main repository of the impromptu verses was the untrained memory of his disciples, who gathered around him, not to become Pandits of literature, but merely to be enlightened by his teachings. When such were the conditions, when writing materials were too meagre to be thought of, it is quite probable that his original verses might have suffered, in course of time,

In Public domain. Digitization Muthulakshmi Research Academy

from many alterations, interpolations and excrescences. Falling to recognize even this naked truth, some derive satisfaction in deriding Vemana's ideas as queer and his language as unelegant.

The self and ego permeate all the phemomena. The ego projects itself out as dead matter and is unreal, while the self constituting truth, knowledge and bliss is real. This basic truth is explained very frequently in Vemana's verses. He denounced casteism and religious sectarianism with all the vehemence of his nature; yet, there are some persons who do not hesitate to read Saivite Sectarianism into his verses from the occurrence of the word Siva, even though the poet used it merely to connate grace and auspiciousness. What does praise or abuse matter for such a sage who cared little for his mundane existence or physical pleasures and who was too engrossed in the contemplation of the spirit to find time to court adulations or shun indictments? As a Cuckoo breathes forth its melodies from the natural springs of its heart, so did Vemana sing his spiritual songs without the slightest tinge of self-conceit.

Every Andhra citizen knows Annamayya, Thyagayya and Vemana as the torch bearers of spirituality, who not only realized the highest deal of their earthly existence, but worked for the emancipation of the ignorant by disseminating seeds of wisdom- the two through their musical songs and the other through his metrical verses. The songs of Thyagayya and Annamaya got into the mouths of persons whose enthusiasm for music was not matched by a regard for literary proprieties and acquired several blemishes which have since been cleared by the labours of Telugu and Sanskrit scholars. The songs collected by these scholars now number more than sixteen thousand and it is admitted that they contain the essence of the Upanishadic wisdom. The literature of Vemana met with the same fate as

In Public domain. Digitization Muthulakshmi Research Academy

that of Thyagayya. Nevertheless, since 1825, renowned scholars have done their best to recover and resuscitate the writings of Vemana and through their labours he is now widely known as a poet and a scholar. His verses have been translated into Tamil,Caranese, English, Persian etc. Scholars like C.P. Brown, Cambell, Macclin Panchagnula Adinarayana Sastri, Venkata Parvateeswara Kavulu, Varadhacharya, Vanguri Subba Rao, Kattamanchi RamalingaReddy, Kurma Venkata reddi Naidu, Raghupati Venkatratnam Naidu and Rallapalli Ananta Krishna Sharma and publishers like Thyagaraja Chetty Company and Vavilla Company have worked hard to bring to our notice the beauties of Vemana's literature. His verses, which have been collected so far number more than 5000.

The noble sayings of great men have gained wider publicity by being translated into Sanskrit . Therefore we have thought it desirable to publish the sanskrit translation of it, in the *anustup* metre.

The spiritualist- poet cares little for the protection that an earthly ruler can afford. God is his prop; he lives always in communion with the Omnipresent Bliss having subdued the conflicting elements of his nature. How can the ruling magnates or their subjects, whose knowledge is limited to a few worldly matters understand and appreciate the transcendentalist? The poets that could bend their thought currents to suit the tastes of the rulers have come to enjoy their gifts of free-holdings and other rewards. This is the state of affairs in our world.

Though the poetry of Vemana is full of literary graces and figures of speech like similes and metaphors, it was not till his works had been translated into different foreign languages, and in Sanskrit. This edition has been brought out with the

In Public domain. Digitization Muthulakshmi Research Academy

help of previous edition brought out by the authors themselves long back. We can well imagine what would have happened to this literature if those scholars had not spent this labours on the subject.

Addressing himself as his own listener, Vemana popularized through his verses the highest transcendental wisdom culled from the Upanishadic lore. The basic truth explained in his writings is that the objective world is but a manifestation of Brahman.

We see in Vemana's writings a keen eye for the beauties of nature, deep knowledge of the creative processes, a scholarly treatment of the language, a cultivated purity, of thought, a pleasant imagination, an ability for picturesque portrayal, a dexterity in handling similes, a power to reach the readers sensibility, a clear understanding, a simple and natural expression and an unswerving devotion to the service of humanity – these are the qualities that go to make a true poet.

The great vedic lore that had once filled the human mind with light and joy, and the banner of the Aryan Dharma, that had once flown a loft, lost their chastening influence and, as ages passed, fell into utter oblivion giving place to the polity of the *Puranas* which required no strenuous effort to understand or follow. This transition resulted in the loss of the spiritual energy and the social solidarity, which were characteristic of the Aryan race. Real wisdom fell to ruins wherefrom sprang up chimerical fancies. The ideas of human equality and fraternity disappeared giving rise to social inequalities, intolerance and friction. The Aryan race, that once held the torch of freedom of thought and action, stoped to imbecile imitation. Blind orthodoxy superseded reason and the

In Public domain. Digitization Muthulakshmi Research Academy

most despicable intellectual slavery throttled the soul and hurled down the race from its pedestal of glory. The race cannot come to its own, until it eschews all the delusions born of ignorance and inertia, and revitalises itself with the manna of true wisdom. It is that true wisdom that the reader should crave for.

In the ideal world of Vemana, there is no place for hypocritical idolatries, thoughtless pilgrimages and ritualistic formalities. He did not subscribe to the belief that God would automatically take an incarnation for the easy redemption of lazy persons. He taught, again and again, that man's path to his redemption lay through truth and nonviolence and his own mercy and self-realization. Of all the creatures' man alone is endowed with the faculty of critical reasoning for distinguishing truth from untruth. Should he not be grateful to the all – pervading- Omni scent Lord who is the ever wakeful protector in times of distress and the all-giving Benefactor in times of need?

The aim of this work is to help the seekers in liberating themselves from the bonds of ignorance and illuminating their path with wisdom on their march to self realisation.The transcriation of this work into sanskrit will cirtainly be a valuable addition to sanskrit literary world.

Sri.G.Sriramamurty and Sri. I. Narasimha murty have rendered remarkable service to the cause of the Indian culture by translating Vemana's literature into the Sanskrit language which is the common heritage of every Indian. We acknowledge the service rendered by the authors / translators.

In this book we have nearly 1000 verses, of which 500 belong to moral though and other 500 to spiritnal leany. We

In Public domain. Digitization Muthulakshmi Research Academy

have also selected some key words, that show the theme of each verse. This index is vert much helpful to the occasional readers to search topics of their interest.

We are thankful to Prof. Radhavallabh Tripathiji, V.C. Rashtriya Sanskrit Sansthan and Prof. R.Devanathan, Registrar, Rashtriya Sanskrit Sansthan for their kind support. We are also thankful to the Chairman and V.C. of O.U. Prof. T.Tirupati Rao, and other members of Mangement committee for their kind support.

Shrinivasa Varakhedi
DIRECTOR.

In Public domain. Digitization Muthulakshmi Research Academy

आकूतम्

अस्याः वेमगीतायाः रचयितारौ शतावधानिनौ संस्कृतान्ध्रभाषयोरनर्गल निरवद्याशुकविताप्रबन्धचातुरीधुरीणौ उभयभाषाप्रवीणौ आन्ध्रविश्वविद्यालय प्राच्यभाषापट्टभद्रौ श्रीगद्वालसंस्थानास्थानकविवरेण्यौ श्री गन्धं राममूर्ती, इरिङ्की नरसिंहमूर्ति महाभागौ। एतौ महाराज्ञाः आदिलक्ष्मीदेव्याः परिपालनकाले युवराजासाहब् कृष्णरामभूपालेन गौरवसमर्पितास्थानकवियोग्यपत्रौ। व्यासस्य भागवतसहितां सलक्षणया शैल्या यथातथमान्ध्रभाषायां पद्यकाव्यरूपेण अनूद्य चरितार्थतां प्राप्तौ। व्यासर्षिप्रणीतभगवद्गीतां यथावत् आन्ध्रभाषायां तेटगीतिपद्येषु अनूद्य च स्वप्रतिभां आध्यात्मिकानुभूतिं च प्रकटयामसतुः। अपि च महात्मागान्धी इत्याख्यं खण्डकाव्यं स्वतन्त्रभावैः संस्कृतभाषायां विरच्य स्वकीयं भावगाम्भीर्यं सहृदयेभ्यो अदर्शयताम्। एवमेतौ सहृदयलोकस्य पूर्वमेव सुपरिचितावास्ताम्।

१५ शतब्द्यां आन्ध्रयोगी विविधशास्त्रविद् वेमनाख्यः स्वकीयया अनुभूत्या तत्काले संघे प्रचलितान् दुराचारान् उद्घाट्य नैतिकसंस्कृतिक-आर्थिकसामाजिकसांसारिक-आध्यात्मिकादिविषयान् संस्करणपूर्वकं यथेच्छमान्ध्रभाषायां आटवेलदि पद्यरूपेण जगौ। तेषु वेमनकविगीतेषु आटवेलदि पद्येषु प्रथमसहस्रं संचच्य संस्कृतीकृत्य आन्ध्रलिप्यां सम्प्रकाश्च च यावदान्ध्रदेशेऽपि वेमनयोगिवरस्य निरूपमां प्रतिष्ठां सम्पादितवन्तौ इमौ श्रीरामनृसिंहमूर्ति कविवरौ अतीव प्रशंसनीयौ।

प्रभावप्रकटनार्थं प्रगल्भवचांस्युक्त्वा वृथा कल्पितबिरुदानि धृत्वा पामरजनपठनीयानि यानि कानिचित् शृङ्गारकाव्यानि विरच्य लोलात्मनः प्रभून् प्रजाश्च वशीकृत्य धनं हृत्वा दुरभ्यासवशंगतानां शृंकारकवीनां मध्ये एतादृशा माध्यात्मिकसत्कवीनां स्थानं न लभतेति नग्नसत्यमेव। तथापि पदपद्यकवितायाः भक्तिज्ञाननिजानुभूति-कलिताध्यात्मिक तत्त्व प्रोत्थितभाव तरङ्गैः आत्मानन्दायैव स्वयं गानं कृत्वा मुक्तिपथं गतौ आन्ध्रदेशीयौ त्यागयवेमनाख्यौ पुण्यपुरुषौ भासेते। ग्रन्थोऽयं जातिमतबाह्यन्याय धर्मसत्यप्रतिपादनयैव उद्दिष्टः, जनानां

In Public domain. Digitization Muthulakshmi Research Academy

मौढ्यतमो निवारयति नात्रसंशयः। आन्ध्र्यां तत्रापि व्यावहारिकभाषायां पामरजनसुबोधार्थं पण्डितजनानामपि दुरवगाहानि तत्त्वरहस्यानि निक्षिप्य स्वप्रतिभां वेमनयोगी विशदयामास। व्यावहारिकभाषायाः संस्कृतानुवादः अतिक्लेशजनक इति तद्विदां विदितमेव। तमिमं क्लेशकरमनुवादं श्रीरामनृसिंहमूर्तिकवी सहृदयहृद्यं यथा तथा साधयामासतुः। ग्रन्थेऽस्मिन् षट् विभागाः साहस्रं पद्यानि सन्ति। सामान्यतः ग्रन्थादौ ग्रन्थनिर्विघ्नपरिसमाप्त्यर्थं यस्य कस्यापि देवस्य वा यस्याः कस्याः देवतायाः स्तुतिः भवतीति सर्वेऽपि जानन्त्येव। परन्तु अस्यां वेमगीतायां आदौ कवी श्लोकद्वये योगिवर्यस्य वेमनस्य स्तुतिं चक्रतुः। अयं योगिवर्यः सनत्कुमारांश संभूतः इति द्वितीय श्लोके अवोचताम्।

योगिवर्योयं नैतिकविभागे नीतेः प्राशस्त्यं कथयन्, नीतेः प्रथमं सोपानं आत्मशुद्धिरिति श्लोकेऽस्मिन् एवमवादीत् –

आत्मशुद्ध्या विनाचारः पाको भाण्डे न शुद्ध्यति।
चित्तशुद्ध्या विनाचारः शिवपूजा निरर्थिका।। इति। (१)

नीरसानि पद्यानि व्यर्थानि इति वदन् सरसं पद्यं एकमलमिति पद्येऽस्मिन् व्यनक्ति

एकेनालं जातिनीलमणिना किं बहूपलैः! ।
रसयुक्तं पद्यमेकं पठितुं वेम युज्यते ।।२ ।।

दानधर्महीना प्रजा निरर्थकाः, ते संसारस्य भारभूताः इति कथयन् पद्यममुं उदाहरति
दान धर्म क्रियाहीनैः पुंभिर्वेमनिरर्थकैः।

पापपुरुषाः पुण्यपुरुषाश्च रूपे एकविधा भवन्ति। पुण्यपुरुषाः तेषु विलक्षणाः भवन्ति इति कर्पूरलवणे उदहरति अयं योगीन्द्रः।

कर्पूरं लवणं चैकरूपं भिन्ना रुचिस्तयोः
वेमैवं पुण्यपुरुषाः पुरुषेषु विलक्षणाः ।।८ ।।

श्लोकोऽयं अमु नीतिश्लोकं स्मारयति –

In Public domain. Digitization Muthulakshmi Research Academy

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।

वसन्तकाले सम्प्राप्ते काकः काकः पिकः पिकः ।।

विमृश्यैव कार्यं कुर्यादिति, अविमृश्य कार्यं न कुर्यादिति श्लोकोऽयं व्यनक्ति–

अविमृश्यकृतं कार्यं मैढ्याद्यद्विषयं भवेत् ।

लूनश्शलाटुर्विन्यस्तः फलं भवति वेम किम् ।।

अस्य श्लोकस्य उपरि भरविप्रभावः महान् । विद्यते । उक्तं च किरातार्जुनीये –

सहसा विदधीत न क्रियां अविवेकः परमापदां पदाम् ।

वृणुते हि विमृश्य कारिणं गुणलुब्धा स्वयमेव सम्पदः ।।

सहिष्णुता यस्य कस्यापि नोपपद्यते इति श्लोकममु मुदाहरति ।

अनेककाव्यपठनं बहुशब्दाभिभाषणम् ।

कथञ्चिश्छक्यतने वेम दुर्लभा हि सहिष्णुता ।।७९

लोके प्रत्येकस्य प्रयोजनं भवति, व्यर्थ वस्तु किमपि नास्तीति श्लोकममुदाहरति ।

लवणं स्यात्कियद्वेम तल्लाभस्तु कियानिति ।

न मन्तव्यो हि भोगैः किं फलं स्यादुपयोगतः ।। ८४ ।।

उन्नतगुरुं अधिकृत्य कथयन् सः कीदृशः तेन प्रयोजनं किमिति कथयति –

वेम कर्मसु सर्वेषु निबन्ध्नात्यधमो गुरुः ।

मन्त्रेषु मध्यमश्चैव योगसाम्राज्य उत्तमः ।।१०१

मूर्खं यः कोपि न परिवर्तयति इत्यस्मिन् श्लोके कथयति –

सम्पच्य गार्दभक्षीरं यदि शर्करयाप्लुतम् ।

भक्ष्यं भवेत्किं? मूर्खोऽपि वेमार्यो न तथैकदा ।।१३५ ।।

तृष्णायाः स्थितिं वदन् आशया कथं नश्यति जनः इत्यंशं अत्र श्लोके उदाहरति

In Public domain. Digitization Muthulakshmi Research Academy

मांसाकांक्षी जले मत्स्यो बडिशे वेम! बध्यते।

आशापाशशतैर्बद्धो विनश्यति तथा नरः ।।२९ ।।

राज्ञां रणाङ्गणे एव चिन्ता भवति, तपस्विनां परमात्मनि एव। अधमानां चिन्ता योषित्सु एव भवति इति अस्मिन् श्लोके वदति।

राज्ञां रणाङ्गणे चिन्ता परे चिन्ता तपस्विनाम्।

अधमानां नृणां वेम! चिन्ता योषित्सु सर्वदा ।।

श्लोकोऽयं अन्यकवेः अभिप्रायं स्मारयति –

नान्यन्मनोहारि नितम्बिनिभ्यो दुःखैक हेतुर्न च कश्चिदन्यः

श्लोकोऽयं भर्तृहरिं स्मारयति – *शक्यो वारयितुं...... इति*

सुभिक्ष – दुर्भिक्षे कीदृशे इति इति कथयन् जीवयात्रामधिकृत्य प्रबोधयति अयं वेमनार्यः –

वर्षाभावाद्भवेत् क्षामो वर्षाधिक्येन संप्लवः।

क्षामं च संप्लवं वेम क्रमाज्जानीहि तत्त्वतः ।।१८० ।।

अगौरवमातिथ्यं, अभक्तिपूजादिकं अपात्रदानं व्यर्थमिति वदति–

भोजनादप्रियाद्वेम भक्ष्यनाष्टि रभक्तितः

पूजनात् पत्रानष्टि श्चापात्रदानाद्धनव्ययः ।।८९।।

अस्य श्लोकस्य अभिप्रायं अन्यत्र ग्रन्थे श्लोकोऽयं स्मारयति –

नैकग्रामीणमतिथिं संगृह्णीत कदाचन।

अनित्यमागतो यस्मात् तस्मादतितियिरुच्यते

ब्राह्मणोह्यनधीयानस्तृणाग्निरिव नश्यति।

तस्मै हव्यं न दातव्यं न भस्मनि हूयते ।।

आर्थिकविभागे धनमधिकृत्य, दानं विना न धनस्य कीदृशी गतिरिति वदति –

In Public domain. Digitization Muthulakshmi Research Academy

न दास्यन्ति न भुञ्जन्ति पैशुन्याद्धनिनो यदि ।

अवश्यं तच्छ्रियं वेम! नश्यन्त्युत्तरजन्मसु ।। २१९ ।।

अस्य श्लोकस्य अभिप्रायं अन्यत्र श्लोके एवं द्रष्टुं शक्यते –

दानं भोगो नाशस्तिस्रो गतयः भवन्ति वित्तस्य ।

यन्नददाति न भुंक्ते तस्य तृतीया गतिर्भवति ।।

निर्धनस्य पुरुषस्य स्थितिं एवं वदति कविः –

निन्दन्ति निर्धनं पुत्राः न स्पर्शं सहतेऽङ्गना ।

वेमाहो धनराहित्यं सर्वस्यापि सुदुस्सहम् ।।२२४

श्लोकोऽयं भर्तृहरिं स्मारयति –

माता निन्दति नाभिनन्दति पिता भ्राता न सम्भाषते

भृत्यः कुप्यति नानुगच्छति सुता कान्ता च नालिङ्गते ।

वादं मत भेदं च निरस्य, समाजे मतभेदाः अनावश्यकाः इति कथयन् श्लोकममुं वदति ।

वादैः किं? मतभेदैः किं? भस्मीभूता हि वैष्णवाः ।

तथा लिङ्गधरा वेम! सर्वे स्युर्मृत्तिकामयाः ।।३५३ ।।

हिंसावादमधिकृत्य विशदयन् हिंसावादी चण्डालादपि न्यूनः इति वदति कविरयम् –

अहिंसा परमो धर्मः ये वेम प्राणिखादिनः ।

तेभ्योऽपि मृतपश्वाशी वरं चण्डाल एव हि ।।

स्त्रीसत्यताविषये एवं वदति – स्त्री स्वमनसि स्थितं कदापि न प्रकाशयति । इति कथयन् –

नावस्सत्यं वार्धिमध्ये शकटस्य बहिस्स्थले ।

व्यक्तं भवति वेमाहो! स्त्रीसत्यं नास्ति कुत्रचित् ।।४४३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

लोके कौटुम्बिकजनाः बुद्धिमन्तः कुशलिनश्च यदि भवन्ति, तदा (स्वर्गेणापि) स्वर्गस्यापि प्रयोजनं नास्तीति योगिवर्योऽयं सूचयति।

यदि भार्या गुणवतां पुत्रका बुद्धिशालिनः।
तदा संसारिणो वेम! किं? स्वर्गेण फलं वद।। ४५६

अत्याशी जनः सर्वदा शुन इव अटति इति बोधयन् –

अत्याशाग्रस्तहृदये भ्रमते विमतिर्नरः।
आशा शुन इव स्वास्थ्यं पुंसो वेम! न यच्छति।।५१३।।

षड् ऋचय भिन्नाः सारः एक एव, सत्य निष्ठाः भिन्ना अपि सत्यमेकमेव। ऋचयः भिन्ना अपि परमात्मा एक एव इति वदन् एकं सद् विप्राः बहुधा वदन्ति। इति ऋचं स्मारयति योगिवर्योऽयम्। अस्य भावः अन्यत्र श्लोके दृश्यते –

रसाः पृथक् षडेको हि सारस्सत्यरतिः पृथक्।
सत्यमेकं तु ऋषयः पृथक् वेमैक ईश्वरः।।५३७।।

अस्य श्लोकस्य अभिप्रायं अन्यत्रापि अधिगन्तु शक्यते।

गवामनेकवर्णानां क्षीरं स्यादेकवर्णकम्।
क्षीरवद्भाति हि ज्ञानं देहिनां च गवां यथा।।

नैपुण्यमेकमेव नालमिति, भगवत्कृपा आवश्यकी इति श्लोकममुं उदाहरति –

अप्रसन्ने विभौ तन्व्याः वृथा रूपं नवं वयः।
नैपुणी वेम! मर्त्यस्य नाभाति त्वत्कृपां विना।।५४२।।

आशापरित्यागस्य माहात्म्यं एवं वदति –

श्रेयो दानादिह ध्यानं ध्यानात् ज्ञानं विशिष्यते।
ज्ञानादाशा परित्यागः सर्वधा वेम! चोत्तमः।।५२१।।

अन्तःकरणशुद्धिं विना बाह्यपूजाः निरर्थकाः भवन्ति इति, ताभिः मोक्षप्राप्तिश्च

In Public domain. Digitization Muthulakshmi Research Academy

न भवति इति अस्मिन् श्लोके वदति –

जपं च बाह्यपूजां च कृत्वात्यन्तमनन्तरम् ।
न त्यजन्तश्छलं वेम! मग्ना स्तमसि बन्धिताः ।।५११ ।।

शरीरं अनित्यमिति आत्मस्वरूपं शाश्वतमिति श्लोकोऽयं वदति–

म्रियते मृद्घटसमा तनुरात्मा न कर्हिचित् ।
पृथग्रूपा वेम! घटा एकरूपो विहाय सः ।।५५५ ।।

ज्ञान स्वरूपमेव परमत्मा, तस्मात् ज्ञानोपा र्जनमेव जीवस्य आवश्यकमिति योगि वर्यः एवं व्यनक्ति –

ज्ञानतुल्यं सुखं नास्ति ज्ञानं वेम! न विद्यते ।
ज्ञानस्य साम्यं ज्ञानं हि ज्ञानं तत्त्वं हि केवलम् ।।५५८

जितमानसः एव श्रेष्ठः इति, तादृशः मनोजयी यदा कदापि अवश्यं मुक्तिमाप्नोति इति श्लोकोऽयं वदति–

धृत्वा जित्वा मनस्तस्मिन् यस्सुखी मुक्तिमेति सः ।
उत्प्लवन्तस्तरुं वेम! न किं गृह्णन्ति तत्फलम् ।।५५९ ।।

यः स्वयं अविज्ञायैव परानुपदिशति सः पशुतुल्यः इति कथयन् अमुं श्लोकं उदहरति–

न वेत्ति स्वयमात्मानमन्येभ्यो बोधते कथम्? ।
पशुतुल्योऽलसो वेम! बध्नात्यर्थाय कर्मसु ।।५८९ ।।

भवोऽयं अमुं श्लोकं स्मारयति –

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
स्वस्यानुष्ठानसमये मुनयोऽपि न पण्डिताः ।।
परप्रबोधवेलायां सर्वे व्यासमहर्षयः ।

In Public domain. Digitization Muthulakshmi Research Academy

समाजे सर्वदा मायाविनः सन्यासिनः सन्तीति तान् स्वीय वस्त्रधारणेनैव ज्ञातुं शक्यंते इति अमुं श्लोकं उदाहरति वेमाख्योयोगिवर्यः

काषायधारी योगीव स्थितः कामान् मुहुर्बहिः ।

निक्षिप्य वर्तते वेम यस्स मायी मुनिर्ध्रुवम् ।। ७०१

एवं वेमनयोगिवर्यः तत्र समाजे स्वयं दर्शितान् प्रजानां व्यवहारान् पद्धतीश्च सम्यक् निरूप्य, तत्रस्थान् मूढाचारान् समाजे अविनीत्यदिमायापूरित जनानुद्धिश्य च सम्यक् विविच्य समाजशस्त्रचिकित्सां कृत्वा संघसंस्करणे साधिकजीवनमार्गे प्राजाः प्रवर्तयितुं उपदेशात्मकं सहृदयहृदयाह्लादकं आन्ध्रभाषयां स्नहस्रपद्यात्मकं ग्रन्थं विरच्य मुख्यतया आन्ध्रदेशे वेमनाख्यः कवीन्द्रः, यशः कायेन तिष्ठति। तेषु पद्येषु सहस्रं संचच्य शतावधानिनौ उभयभाषाप्रवीणौ गन्धं राममूर्ती इरंकी नरसिंहमूर्तिमहाभागश्च संस्कृतभाषायां अनुष्टुप्- श्लोकेषु अनूद्य यावद्भारतस्य वेमनयोगिरचनायाः परिचयं अकुरुताम् । तौ धन्यौ तयोः जीवितमपि धन्यम्। तयोर्यशः आचन्द्रार्कं तिष्ठति ।

एवं
विद्वविधेयः
डा.वी.श्रीनिवास शर्मा
सम्पादकः

In Public domain. Digitization Muthulakshmi Research Academy

श्री वेमनयोगीन्द्राय नमः

वेमगीता

वेमनयोगीन्द्रस्तुतिः

श्रीवेमाह्वययोगिवर्य पतितानुद्धर्तुकामो जनान्
तत्त्वार्थं प्रतिपादयन्प्रवचनैः हृद्यान्ध्रपद्यात्मकैः ।
सन्देशं भुवि यं त्वमद् भुतमदाः प्राक् द्राक्तमेवाधुना
गैर्वाण्यां गिरि भाषितुं प्रदिश नौ धार्ष्ट्यं नमस्ते नमः ।।

श्रीमत्सनत्कुमारांशं वेदवेदाङ्गवेदिनम् ।
दिगम्बरं कुमाराभं स्तुवो वेमाख्ययोगिनम् ।।

नैतिकविभागः

आत्मशुद्ध्या विनाचारः पाको भाण्डे शुचिं विना ।
चित्तशुद्ध्या विना वेम! शिवपूजा निरर्थिका ।।१ ।।

एकेनालं जातिनीलमणिना किं बहूपलैः! ।
रसयुक्तं पद्यमेकं पठितुं वेम युज्यते ।।२ ।।

काचगोलगतो वेम! यथा दीपो विभासते ।
तथैव विदुषां चापि ज्ञानं देहेऽवतिष्ठते ।।३ ।।

दानधर्मक्रियाहीनैः पुंभिर्वेम निरर्थकैः ।
जातैः किं वा? मृतैः किं वा! वल्मीके तु घुणैर्यथा ।। ४ ।।

मृतिस्स्वपितृपुत्राणां साक्ष्यं भवति चात्मनः ।
वेम! नृणां जीवितानि ब्रह्मकल्पावधीनि किम् ।।५ ।।

अज्ञस्त्वधीतिसमये द्योतते गुणवानिव ।
वेम! पद्मस्योपरिष्ठात् निषण्णो दर्दुरो यथा ।।६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

कृमिकीटावधश्चोर्ध्वं ध्वंसेते वृक्षमाश्रितौ ।
तथा नाशयते ऽभ्येत्य गुणिनं वेम! कुत्सितः ।।७।।

कर्पूरं लवणं चैकरूपं भिन्ना रुचिस्तयोः ।
वेमैवं पुण्यपुरुषाः पुरुषेषु विलक्षणाः ।।८।।

अनानुकूल्ये स्वाधिक्यं न वाच्यं वेम! नम्रता ।
न लोपाय महाद्रिः किं ? न याति मुकुरेऽल्पताम् ।।९।।

यदृच्छया रिपुर्वध्य आत्महस्तगतोऽपि चेत् ।
न हिंस्याद्वेम! सम्यक्त्वं गच्छेत्युक्तिश्च तद्वधः ।।१०।।

अविमृश्य कृतं कार्यं मौढ्याद्यद्विषमं भवेत् ।
लूनश्शलाटुर्विन्यस्तः फलं भवति वेम! किम् ।।११।।

जले धावति वेम! द्राक् नौ स्स्थले न मनागपि ।
अस्थाने तु प्रवीणोऽपि न किञ्चिदुपयुज्यते ।।१२।।

जले ग्राहो गजं कर्षेत् स्थले त्वाकृष्यते शुना ।
तत्स्थानबलमेव स्यात् वेम! न स्वीयमण्वपि ।।१३।।

कुले यद्यस्ति गुणवान् तद्गुणैश्शोभते कुलम् ।
वेम! चन्दनवृक्षेण भासितं काननं यथा ।।१४।।

क्रोडी वेम! सकृत्सूते दश पंच च शाबकान् ।
करिण्येकं तु कलभं पुंसैकेनाप्यलं सता ।।१५।।

ज्ञानी सुबोध्यस्सर्वेषां नाराध्यो हि जडस्तथा ।
कस्समर्थो वेम! नदी वक्रगत्यपनोदने ।।१६।।

अल्पस्साडम्बरं ब्रूते सज्जनस्तु प्रशान्ततः ।
यथा कांस्यं निस्वनते तथा वेम! न काञ्चनम् ।।१७।।

In Public domain. Digitization Muthulakshmi Research Academy

असाधुं श्लाघतेऽसाधुः अज्ञानी लुब्धमेव च।
प्रस्तौति सूकरः पङ्कं पन्नीरं वेम! नैकदा ।।१८ ।।

मन्द्रगत्या वहेद्गङ्गा मलकुल्या रवेण च।
यथा दाता क्षमावांत्स्यात् तथा वेम! न चाधमः ।।१९ ।।

वित्तं दत्त्वा ऽसते पुंसे मौढ्यं तत्पृष्ठगामिता।
वेमाहूतोऽपि किं ब्रूयात्? मार्जालो धृतकुक्कुटः ।।२० ।।

शवे भूते लोभिगेहे धनं दत्त्वेन्धनादये।
अहो मम धनं नष्टमिति वेम! प्ररोदिति ।।२१ ।।

दरिद्रोऽनुसरेत् कांक्षन् सम्पदं कष्टलोभिनः।
वेमानुसृत्य गोमायुः मेषपृष्ठं गतो यथा ।।२२ ।।

विषाद्यैर्लोभिनं हन्तुमलमस्ति पृथङ्मतम्।
स यदाऽभ्यर्थ्य ते वित्तं वेमाशु म्रियते तदा ।।२३ ।।

शृण्वन्न श्रृणुते वेम! पश्यन्नपि न पश्यति।
रुद्धवक्त्रो धनी तिष्ठेत् सन्निपातज्वरी यथा ।।२४ ।।

स्वयं न भुङ्क्ते चाप्तेभ्यो न ददातीह यः खलः।
स पशुर्वेम! सस्येषु न्यस्तपाञ्चालिकोपमः ।।२५ ।।

पूर्वजन्मनि यः पुण्यं नाकरोदिह वेम! सः।
नाप्नोति धनमन्युप्तबीजः फलमिव ध्रुवम् ।।२६ ।।

कृपां विश्वस्य भूपस्य प्रजाद्रोही विनश्यति।
कन्दुको वेम! विक्षिप्तः कियत्कालं वसेद्दिवि ।।२७ ।।

तप्त्वा द्विस्त्रिरयोभग्नं सन्धातुं लोहकारकः।
शक्नोति न मनो भग्नं वेम! सन्धीयते क्वचित् ।।२८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

मांसाकांक्षी जले मत्स्यो बडिशे वेम! बध्यते।
आशापाशशतैर्बद्धो विनश्यति तथा नरः ।।२९ ।।

वक्तुं शक्या नृसिंहेति वेम! नारायणेति च ।
साधुसाध्विति श्लाघोक्तिः न तथा स्याद्धि दातृता ।।३० ।।

औदुम्बरफलं रम्यं तद्गर्भं कृमिसङ्कुलम्।
तथा भीरोश्च मनसि दाढ्र्यं वेम! कथं भवेत् ।।३१ ।।

मूर्ध्न्युष्णीशं कर्णयोश्च भूपे शाटीं महोदरम्।
वीक्ष्यार्थी वेम! संयाति पशुरित्यविमर्शयन् ।।३२ ।।

यद्युर्व्यां पुण्यपुरुषाः न वसन्ति जगन्त्यहो।
कथं तिष्ठन्ति ते वेम! तत्र तत्र वसन्ति हि ।।३३ ।।

चित्तशुद्ध्या कृतं पुण्यं न स्वल्पमपि हीयते।
कियन्मात्रं वेम! बीजं न्यग्रोधस्य महातरोः ।।३४ ।।

विहाय गृहिणीं वेम! जारकान्तासु यो रतः।
स स्यात् सस्यपरित्यागात् उञ्छग्राहीव भग्नधीः ।।३५ ।।

राज्ञां रणाङ्गणे चिन्ता परे चिन्ता तपस्विनाम्।
अधमानां नृणां वेम! चिन्ता योषित्सु सर्वदा ।।।३६ ।।

मातापित्रोः कृपा येषां नास्ति तैर्नीचमानवैः।
जातैर्वेम! मृतैः किं वा? वल्मीके तु घुणैर्यथा ।।३७ ।।

आभिजात्यमदेनाज्ञाः यावज्जीवं भ्रमन्ति हि।
मलभाण्डे परिव्याप्ता वेम! वै मक्षिका इव ।।३८ ।।

भिन्ने कुम्भे नवं कुम्भं प्राप्तुं शक्यं यथोचितम्।
प्रभ्रष्टो मानवो वेम! न प्राप्नोति यथास्थितिम् ।।३९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

किं स्यान्मुक्तिश्छद्मवाक्यैः? न युक्तं व्यर्थजल्पितम्।
तद्गुरोर्लक्षणं न स्यात् वैगुण्यं वेम! केवलम्।।४०।।

गीते गीते रागवृद्धिः भुक्तेः भुक्ते च माधुरी।
निम्बे तु स्यात् क्रियास्सर्वा वेम! वश्याः कृते कृते।।४१।।

सरघा मधुकोशानां भृङ्गस्सुमरसस्य च।
भक्तिमान् योगिवर्याणां वेम! जानाति पद्धतिम्।।४२।।

विना शिवानुभूतिं स्यु स्साधका नाप्तसंशयाः।
विना दीपं दीप्तिमन्तं तमः किं वेम! नश्यति।।४३।।

दर्वीमितं च गोक्षीरं योग्यं कुम्भमितेन च।
खरक्षीरेण किं वेम! भक्त्यात्वत्तान्नं लघु प्रियम्।।४४।।

पाषाणे कूपखननात् फलाभावः पृथुश्श्रमः।
पूर्तं निम्नस्थले कूपं वेमात्मकुलमुद्धरेत्।।४५।।

निर्वक्रः क्रियते चाश्मा वचश्च क्रियते ऋजु।
ऋजुकर्तुं मनो वेम! न शक्यं खलु कस्यचित्।।४६।।

स्वानुभूतिं विना शास्त्रवासनाभिः परैषिणः।
संशयो वेम! नापैति चित्रदीपात्तमो यथा।।४७।।

जन्मनः प्रभृतीहाज्ञः पुरुषः पापचिन्तनम्।
करोति वेम! श्वा पङ्गुः हृदि मांसाशनो यथा।।४८।।

भेत्तुं शक्यश्शिलागोलः शैलाश्चूर्णयितुं तथा।
कर्कशानां मनो वेम! द्रवीकर्तुं न शक्यते।।४९।।

मरीचोपरिभागस्तु वर्णतो वेम! मेचकः।
दष्टो रूक्षोभवेदन्तस्सतां सारो हि तादृशः।।५०।।

In Public domain. Digitization Muthulakshmi Research Academy

कस्तूरी वर्णतो नीला तस्या गन्धो मुदावहः ।
ये तु सद्गुरवो वेम! तेषामेतादृशा गुणाः ।।५१ ।।

यद्यदाता वसेद्दातुः पार्श्वे दानं न वर्तते ।
अधः कल्पतरो र्वेम यक्षाक्षीव निरुध्यते ।।५२ ।।

अल्पबुद्धावधिकृते श्रेष्ठान् सर्वान् व्यपोहति ।
पादरक्षाशनश्वा किं वेत्तीक्षोर्वेम! माधुरीम् ।।५३ ।।

दोषस्सर्वजनानां स्यात् सर्वे दोषगवेषिणः ।
वेम! दोषान्वेषिणस्तु स्वदोषं न विदन्ति हि ।।५४ ।।

स्वबान्धवा दारपक्षे मातृपक्षे यथोचिताः ।
पितृपक्षे जना ये तु दायादा वेम! सर्वशः ।।५५ ।।

अनेकोक्तं वचो ग्राह्यं एकोक्तं वेम! नेष्यते ।
तूष्णीं भूतं नरं जेतुं पुरं सर्वं न शक्यते ।।५६ ।।

नास्ति चिन्ता जनो गेहं प्राप्नोति पिशुने मृते ।
वृके मृते किं रुदन्ति? मेषा वेम! स्वचेतसि ।।५७ ।।

चोरा गिरिचरा नीत्वा कृत्वा नूत्नाम्बरं कपिम् ।
यथार्चन्ति तथा वेम! निर्भाग्या नीतिवर्जितम् ।।५८ ।।

रजको लुलितं कृत्वा वस्त्रं शुद्धं करोति हि ।
हितोपदेष्टा शिक्षेत यदि स्यात्तेन वेम! किम् ।।५९ ।।

शर्कराक्षीरसम्मिश्र गोतुम्बीपाक एव च ।
न रोचते हि दुर्बुद्धेः गुणो वेम! कथं भवेत् ।।६० ।।

साचीकरोत्यहिर्भोगं दिदंक्षुर्वेम! नाशकः ।
मैत्रीं करोति राजा च जिघांसुः कुरुते प्रियम् ।।६१ ।।

In Public domain. Digitization Muthulakshmi Research Academy

प्राग्वासनायुतस्य श्री वेंम! पुण्यात्मनस्सदा।
झरीव स्यन्दते ऽन्येभ्यो दत्ताप्यास्ते यथातथम्।।६२।।

यदि तिष्ठेत्समं दुष्टैः भवेद्धानिस्सतोऽपि च।
वेमाधस्तात्तालतरोः पयः पानसमं हि तत्।।६३।।

अज्ञान् प्रभून् कियत्कालं भजतोऽपि न जीविका।
आकांक्षतोऽपि वन्ध्या गौः वेम! प्रस्नौति किं पयः।।६४।।

वन्ध्यां धेनुं वेम! दोग्धुं घटे नीतेऽङ्घ्रिभिर्दतः।
पातयेन्न पयो दत्ते न लाभो लुब्धयाञ्चया।।६५।।

यदि गेहे विशेन्नीचो हानिस्स्यान्महतोऽपि च।
प्रविश्य मक्षिकः कुक्षौ क्षोभं वेम! करोति हि।।६६।।

वेद्यो धर्मो धार्मिकेन न तथा कष्टजीविना।
अप्रविश्य जले वेम! ज्ञायते न ह्यगाधता।।६७।।

प्राप्तिं विनैव दातारो न दास्यन्तीति गर्हणम्।
स्वनासावक्रतां वीक्ष्य वेम! दर्पणदूषणम्।।६८।।

गुणी पितुस्सुतश्लाघ्यो न गण्या बालवृद्धता।
वेम! त्यक्त्वा वासुदेवं वसुदेवं स्मरन्ति किम्?।।६९।।

उपानहि शिला वेम! श्रोत्रे च पशुमक्षिका
कण्टकं पद्यक्षिण रेणुः दुर्भरः कलहो गृहे।।७०।।

सदाचारः क्षुधा वेम! तमसा चित्तशुद्धता।
गर्भोत्पत्त्या च पूर्वस्थं दार्ढ्यं देहस्य नश्यति।।७१।।

कोपेन घनता नश्येत् कोपेनैति व्यथां भृशम्।
यदि संहरते कोपं वेम! सिद्ध्यति वाञ्छितम्।।७२।।

In Public domain. Digitization Muthulakshmi Research Academy

दारिद्र्ये बान्धवो वैरी दारिद्र्ये हीयते परम् ।
दारिद्र्ये वेम! मर्त्यानां विनश्येदात्मगौरवम् ।। ७३ ।।

कृशीभूतं मृगेन्द्रं च पार्श्वे श्वा वेम! बाधते ।
यदा बलं विलुप्तं स्यात्तदा प्रज्ञा न शोभते ।।७४ ।।

बलं परस्यात्मनश्च न जानन् योऽभिवर्तते ।
स वेम! दीपिका सेवि भल्लूकसदृशो भवेत् ।।७५ ।।

धूर्तस्य सूचको मित्रं कुमन्त्री मूढभूपतेः ।
वानरो बान्धवो वेम! चोरस्य गिरिचारिणः ।।७६ ।।

साधुनिर्धारितोक्तेश्च नेति गर्हाक्षणादभ्वेत् ।
तां तु वेम! स्थिरीकर्तुमवतीर्याः पितामहाः ।।७७ ।।

श्रेयो विचिन्त्य सर्वेषां वेम! धर्मं ब्रुवन्ति ये ।
तान्निन्दन्ति खला धूर्तो हिनस्ति तृणदं वृषः ।।७८ ।।

अनेककाव्यपठनं बहुशब्दाभिभाषणम् ।
कथंचिच्छक्यते वेम! दुर्लभा हि सहिष्णुता ।।७९ ।।

निर्गतस्सलिलान्मत्स्यो म्रियते नात्र संशयः ।
जलस्थः प्लवते वेम! तथा सर्वे निराश्रयाः ।।८० ।।

मुख्यं वेमैकमत्यं स्यात्तद्बलेन महत्फलम् ।
राज्जुं कृत्वा शुष्कतृणैः किं न बध्वनन्ति सामजम्? ।।८१ ।।

नागाधताभयं वेम! तरणोपायशालिनः ।
प्राग्दोषिणस्तु किं भीत्या कपि श्चंक्रमते न किम्? ।।८२ ।।

किं वैद्येनागदज्ञेन किमलोपज्ञकांक्षया ।
चित्तानभिज्ञैः किं वेम! मर्मज्ञैः पूरुषैर्भुवि ।।८३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

लवणं स्यात्कियद्वेम! तल्लाभस्तु कियानिति।
न मन्तव्यो हि भोगैः किं? फलं स्यादुपयोगतः ॥८४॥

यद्यग्रेऽन्यो जनस्स्थित्वा न पृच्छेत् साध्वसाध्वपि।
साध्वित्येव वदेद्वेम! यदि प्रष्टा न तिष्ठति॥८५॥

अहेरिव क्रूरदंष्ट्रात् त्रसेयुः दुष्टवैभवात्।
दौष्ट्यं वेम! कथं तिष्ठेत् वीतदंष्ट्रफणाभृतः॥८६॥

वचश्शतं वेम! वाच्यं नैकं लेख्यं मनागपि।
साक्ष्यं न युक्तं लेखायाः असल्लेखा तु हानये॥८७॥

दक्षो नूनं समीपस्थः प्रौढो दूरस्थलस्थितः।
ये चरन्त्यनुसृत्येह वेम! सिद्ध्यंति तत्क्रियाः॥८८॥

न कागुणितबोधेन न शास्त्राध्यापनेन च
भवन्ति गुरवो वेम! स्याद्गुरुर्मुक्तिदर्शकः॥ ८९॥

कवाटा श्चार्गला वेम! द्वारबन्धे यथा स्थिताः।
तथा वक्त्रस्य नियमाः धन्यस्स्याद्धर्मवाचकः॥९०॥

छुरिका कृन्तने दक्षा तत्सरु र्न तथा मनाक्।
विना ज्ञानेन किं कुर्या? द्वेम शारीरिकं बलम्॥९१॥

सर्वविद्यासु सम्पन्ना ये ते परिचयात्सदा।
लघवो वेम! नेहन्ते प्रान्तवृक्षभवौषधम्॥९२॥

जलासेकात् वेम! मल्ली पुष्पयुक्ता भवेत्खलु।
अक्रियस्य फलं कुत्र चापाकादोदनं कथम्॥ ९३॥

रसं फलानां स्वादूनां तृणखादी न वेत्ति हि।
तथा वेमाल्पविद्यानां ज्ञानं भवति नाधिकम्॥९४॥

In Public domain. Digitization Muthulakshmi Research Academy

यद्यस्ति माता वेमास्ते लालना स्वस्य तन्मृतौ।
न कोऽपि पश्यत्यात्मानं काले गौरवमार्जय ॥९५॥

दृश्यते हि तटस्थेन सर्वं वेद्यं च वेद्यते।
वेमैवं लोकविषया अन्तर्गुह्याश्च तत्त्वतः ॥९६॥

टङ्कसंधानरहितं न साधुस्वर्णभूषणम्।
भटेन रहितो वेम! किं प्रभुस्साधु शोभते ॥९७॥

धृत्वा मेषगलं वेम! पिबेद्यदिगलस्तनम्।
न क्षुन्निवृत्तिर्व्यर्थाशा लोभियाञ्चा तथा वृथा ॥९८॥

प्राग्बोद्धारो विनष्टास्स्युः पुनर्ब्रूते भवानिति।
न निन्देत्सुप्रोक्तमपि वेम! न ज्ञायते हि तत् ॥९९॥

नीतिमुद्घाट्य वेमाख्यो न्येषेधत् पातकानि च।
अगाधतत्त्वं लोकानां वेम! सम्यक् न्यबोधयत् ॥१००॥

सांस्कृतिकविभागः

वेम! कर्मसु सर्वेषु निबध्नात्यधमो गुरुः।
मन्त्रेषु मध्यमश्चैव योगसाम्राज्य उत्तमः ॥१०१॥

स्वनिवासस्थले कष्टं भवेद्यदि सुखस्थलम्।
व्रजेत् शुष्के ह्रदे वेम! बकास्तत्र वसन्ति किम्? ॥१०२॥

यथा पिकः काकनीडे कीटः कुड्यामलेर्यथा।
गुर्वर्चानन्तरं छात्र स्तथा वेम! स्वयं गुरुः ॥१०३॥

महाराजस्वीकृतेऽल्पे तदाज्ञा परिपाल्यते।
गणकाङ्गीकृतौ वेम! वराका मूल्यसंयुताः ॥१०४॥

In Public domain. Digitization Muthulakshmi Research Academy

यद्युत्तमस्य कुक्षौ स्यात् खलो वेम! स तत्कुलम् ।
हिनस्तीक्षोः खलूद्भूय मञ्जरी हन्ति माधुरीम् ।।१०५ ।।

प्रक्षालितं भल्लुकस्य चर्म नैति वलक्षताम् ।
ताडिता प्रतिमा दारोः किं वेम! गुणिनी भवेत् ।।१०६ ।।

यावच्छ्वपुच्छं नालस्थं तावदेव भवेदृजु ।
बहूपदिष्टोऽपि खल स्स्पर्थां किं वेम! मुञ्चति ।।१०७ ।।

चोरो यात्रास्थलं प्राप्य हर्तुं वित्तमुपक्रमेत् ।
प्रभुं नेक्षेत वेम! श्वा भाण्डान्वेषीव गेहगः ।।१०८ ।।

कृतं गुणवते श्रेयः लघ्वप्यद्रिसमं भवेत् ।
अगुणः किं विजानाति वेम! श्रेयोऽद्रिसन्निभम् ।। १०९ ।।

चण्डालोऽस्थिरवाक् मर्त्यः ध्वस्ताज्ञो भूप अङ्गना ।
वेम! दैवं निर्महिम व्याघ्रो मृन्निर्मितः खलु ।।११० ।।

शिवार्पितात्किञ्चिदन्नात् पुण्यलोकं व्रजेन्नरः ।
अन्नदानान्महोत्कृष्टं दानं वेम! न विद्यते? ।।१११ ।।

नोद्वेजयेत् खलून्मत्तं नेयादुन्मत्तजल्पितम् ।
अलर्केण समं वेम! किं कार्या मृगयारतिः ।।११२।।

स्वाङ्गे गन्धं विलिम्पन्तं खर स्ताडयतेऽङ्घ्रिणा ।
कृताऽनर्ह जनाभ्चर्चा वेमैवं स्स्याद्धि निष्फला ।।११३ ।।

सुखापेतं त्यजेद्ग्रामं त्यजेद् भार्यामसद्गुणाम् ।
राजानमप्यदातारं त्यजेद्वेमाशु बुद्धिमान् ।।११४ ।।

बोध्यो जडो वत्सरेण बोध्यो मौन्येकमासतः ।
त्रिंशदब्दैरपि मनाक् वेम! मूर्खो न बोध्यते ।।११५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिश्रुतं ये त्यजन्ति वेम! ते मानवर्जिताः ।
परदुःखानभिज्ञोऽल्पो मित्रद्रोही खलः खलु ।।११६।।

वेम! वार्षागमं चैव प्राणनिर्गममेव च ।
मनीष्यपि न जानाति ज्ञाने तिष्ठेत्कलिः कथम् ।।११७।।

वक्त्रदुर्गन्धनाशाय नागवल्लीदलं सुधाम् ।
क्रमुकं चौषधं देयात् नोचेद्वेम! जुगुप्स्यते ।।११८।।

वञ्चयित्वा परान्वित्तमार्जयित्वोदरंभरिः ।
प्रतिष्ठां नाप्नुयाद्वेम! ऋणी प्राप्नोति किं प्रथाम्? ।।११९।।

शौण्डिकस्य गृहे पीतं क्षीरं मद्यमितीर्यते ।
अस्थातव्यस्थले वेम! स्थितिर्निन्दास्पदा खलु ।।१२०।।

बीजादेवोद्भवंत्याशु कण्टकाः कण्टकद्रुमे ।
मूर्खस्य खलबुद्धिश्च वेम! सञ्जायते तथा ।।१२१।।

एकया गुणिता वेम! एक संख्या ह्यधस्स्थया ।
वर्धते खलु तद्रूपमौदार्यस्यापि तत्फलम् ।।१२२।।

सुपक्वं भक्ष्यममृतं लोचनप्रीतिदायकम् ।
भोजनेनामितेनाशु वेम! सम्प्राप्नुयान्मृतिम् ।।१२३।।

दुष्पाकेन विषं भक्ष्यं लोचनग्लानिदं भृशम् ।
तादृग्भक्ष्ये वेम! भुंक्ते कबलं मृत्युदायकम् ।।१२४।।

प्रभुः कपिश्चेत्सचिवाः क्रोडा वेम भटाः खगाः ।
सेना च पशवश्चाश्वाः गजाश्चाखुबिडालकाः ।।१२५।।

वधोद्युक्तो नृपो वेम! दत्ते प्रीतिं विनाशकृत् ।
मैत्रीं कुर्याद्रिपुर्भोगी दंशोद्युक्तो निरीक्षते ।।१२६।।

In Public domain. Digitization Muthulakshmi Research Academy

यदि क्षिणोत्यनाथस्य रोगिणो दीनतां नरः।
वेमेह स पुमान्पूज्यः परत्राप्युरुभाग्यवान् ।।१२७।।

अनानुकूल्ये त्यक्तेष्टः नयेत्कालं कथंचन।
वेम! जिष्णु र्नानुकूल्ये विरटं किं न सेवते ।।१२८।।

घूकेनाधिष्ठितं गेहं त्यक्त्वान्यत्रव्रजन्त्यहो।
पश्योन्मादं मनुष्याणां ताभ्यां वेमेह किं कृतम् ।।१२९।।

क्षीरेण वर्धितो निम्बः वेम! वर्षसहस्रकम्।
तिक्तं त्यक्त्वा न मधुरस्तथा दुष्टस्य नौचिती ।।१३०।।

शूरं कृत्वा वेम! भीरुं यदि युद्धे नियोजयेत्।
पलायते कार्यहानिर्नालं भीरुर्भटोद्यमे ।।१३१।।

वेम! पङ्गोः कुर्कुरस्य किं वा शशकधावनैः।
भीरोः किं शूरबिरुदैः वृद्धायाः किं दरस्मितैः ।।१३२।।

गुरुर्बुहस्पतिश्चेन्दोर्ददौ शापं हि निर्गुणः।
कदापि वेम! स्वे चित्ते गुरुः क्रोधं न धारयेत् ।।१३३।।

स्तुतिं करोत्यनात्मज्ञां यस्तच्छ्लाघी जडो नरः।
गायन्तीं श्लाघते विख्यां न किं वेम! जडो नरः ।।१३४।।

सम्पच्य गार्दभक्षीरं यदि शर्करयाप्लुतम्।
भक्ष्यं भवेत्किम्? मूर्खोऽपि वेमार्यो न तथैकदा ।।१३५।।

ऋजुतामश्नुते रज्ज्वा शिलाबद्धा पटोलिका।
तथा बद्धश्शुनः पुच्छः त्यजेत्किं वेम! वक्रताम् ।।१३६।।

अवाच्यवादी नीचात्मा सतां जानाति किं प्रथाम्।
वेम! चन्दनसौरभ्यं किं वेत्ति ग्रामसूकरः ।।१३७।।

In Public domain. Digitization Muthulakshmi Research Academy

गज इत्यनृतं प्राह गुरुं हन्तुं कुलं दहन्।
वेम! नाम्ना धर्मराजो निम्बबीजोपमः खलुः ।।१३८।।

किञ्चिच्छ्रुतं दाम्भिकस्तु किञ्चिदेवाश्रुतं वचः।
चित्रं चित्रं वदेद्वेम! साक्षाद्दृष्टमिवाधिकम्।।१३९।।

देशाटनेन यत्पुण्यं दर्शनेनैव तत्सताम्।
वर्षाम्बुमलिनं वेम! नदी संगाद्धि निर्मलम्।।१४०।।

उत्थिते पण्डितम्मन्ये भटवत् वेम! पण्डितः।
शान्तो भवेत्स्यादश्वस्य का हानि र्भषता शुना।।१४१।।

चण्डालकन्यासौरूप्यं दृष्ट्वा त्रैशंकवः पुरा।
न मेने वेम! नेच्छन्ति ह्यकार्यकरणं घनाः ।।१४२।।

विदुषामन्तिके वेम! विद्याहीनो वसेद्यदि।
न विद्वान् भवितुं योग्यो हंसमध्ये बको यथा।।१४३।।

यदि व्याधिर्भवेद्देहे नापैति ह्यौषधादृते।
वेम! तन्निकटे दीपमकृत्वापैति किं तमः ।।१४४।।

छत्रे स्थिते भवेच्छाया ज्ञानं स्याच्छास्त्रदर्शने।
जनके च स्थिते वेम! स्वाश्रयो विद्यते खलु।।१४५।।

शिथिलेदतिदूष्येऽक्ष्णि वेम! गेहे घुणान्विते।
कृमिगर्ते स्तने पीते दार्ढ्यं किं साधु तिष्ठति।।१४६।।

वनं गत्वा श्रमक्लिन्नः प्राप राज्यं ततो नलः।
सहते वेम! कष्टानि यस्स सौख्यानि विन्दते।।१४७।।

अशुचेः किं वैद्यकार्यैः किमन्धस्य प्रधावनैः।
बृहदण्डयुतस्यापि किं वेमाशुविलंघनैः ।।१४८।।

In Public domain. Digitization Muthulakshmi Research Academy

न हि ब्रूयात् प्रगल्भोक्तीः रणे चासत्यवादिनम्।
न लालयेत्तथा वेम! गुरुणा च न तर्कयेत्।।१४९।।

अश्रोता वचसो मर्त्यो मूर्खश्श्रोतातिमानितः।
श्रुतेऽश्रुतेऽपि वेमार्यः न त्यजेत्कथनोद्यमम्।।१५०।।

भावज्ञः परवाक्यस्य प्रत्युक्तिं यदि भाषते।
तुष्येद्वेम! प्रशंसेत्स नोचेदात्मनि कुत्सति।।१५१।।

भारतोक्तेषु सर्वेषु धर्मेष्वपि च सूनृतम्।
उत्तमं वेम! तत्सत्यं भावाश्श्रेयःप्रदा भुवि।।१५२।।

द्वेषस्थलेषु बहुधाप्युदासीनः प्रियं वदेत्।
दाहकः पावको वेम! वसे न्न हि किमिन्धने।।१५३।।

यदि रक्षेत्परैर्दत्तं स्वदत्तादि्द्वगुणं भुवि।
अन्यैर्दत्तं धनं वेम! न हरेज्जातु मानवः।।१५४।।

गृहीत्वा न त्यजेद्वेम! दशलक्षफले न वा।
वदेद्दत्वार्थिने नाद्व्यमपि चार्चेद्वृथा विभुम्।।१५५।।

महिषी वातरोगार्ता दाहैस्स्याद्यदि जीविता।
तस्याः क्षीरं तु किं वेम! जगुप्सितमितीर्यते।।१५६।।

सुतः कश्चित् पितुर्वेम! घनो यद्यपि वर्तते।
तथापि पितरं हीनं कर्तुं नेच्छेत्ततोऽत्ययः।।१५७।।

श्रुत्वा वचः पितुर्वेम! हत्वा मातरमञ्जसा।
भार्गवः किं फलं प्राप? जगामाद्रिं निराश्रयः।।१५८।।

वक्तुकामार्थिनो भावमजानन्नेव धिक्कृतिम्।
न कुर्यात्तेन भणितं श्रुत्वा वेम! प्रियं वदेत्।।१५९।।

In Public domain. Digitization Muthulakshmi Research Academy

सङ्गो दुष्टैस्समं वेम! भवेत्पापकरो भुवि ।
महर्षेश्चापि नापैति तत्सङ्गो मास्तु नश्यसि ।।१६० ।।

अल्पेन पालितोऽवश्यः प्रतीपं वर्तते भटः ।
निवर्तते वा वेमैतत् स्थूणालम्बाटनोपमम् ।।१६१ ।।

त्याज्यपूरुषसङ्गत्या हानिस्स्यात्सर्ववीधिषु ।
स एव वर्तते वेम! दुष्क्रियानिरतो हि सः ।।१६२ ।।

कुजनाश्चापतन् वेम! विजये धृतकार्मुके ।
भजनाभिरतो नूनं विजयं नैति किं भुवि? ।।१६३ ।।

वृष्टिभीत्या विशेदन्तः सहते तीक्ष्णमातपम् ।
कथं लोके जना वेम! न सहन्ते शुभं फलम् ।।१६४ ।।

अन्यायन्यायशास्त्रं धर्मशास्त्रं तथैव च ।
दुर्मताय ज्यौतिषं तु वेम! स्यादविनीतये ।।१६५ ।।

वेम! स्वदोषबाहुल्ये परदोषान् खलो जनः ।
गणयेत् शुष्कुलीं दृष्ट्वा यथा हसति यन्त्रिका ।।१६६ ।।

पक्षिजातिं गृहीत्वाशु हिंसयित्वा च निर्दयम् ।
निबध्य पञ्जरे वेम! न्यसतां तद्गतिर्भवेत् ।।१६७ ।।

देही देवो देवमूलमिति जानन्ति ये बुधाः ।
न यान्ति ते तीर्थयात्रा आत्मारामा हि वेम! ते ।।१६८ ।।

पूजा मुखस्थदारस्य नोचितोरस्थयोषितः ।
रम्योहा वेम! मूर्धस्थदारभक्तिः फलप्रदा ।।१६९ ।।

सञ्जाता यदि जीवेयुर्जना भुवि जगत्सु च ।
नममुर्वेम! कालस्य न्यूना स्याद्गणनाधिका ।।१७० ।।

In Public domain. Digitization Muthulakshmi Research Academy

गृहीत्वा पक्षिणो वेम! हत्वा स्वोदरपूर्तये।
सम्पच्य भुवि यो भुङ्क्ते नूनं चण्डाल एव सः ।।१७१ ।।

स्वनिवासस्थले वेम! संवीक्ष्य चरतो जनान्।
दशति श्वा कथं नीचः गुणं नैसर्गिकं त्यजेत् ।।१७२ ।।

वेमायस्सर्वलोहेषु खनिजेषूपयुज्यते।
बहुधाप्यतिबाहुल्यात् क्रियते तत्र लाघवम् ।।१७३ ।।

मधुना कान्तसिन्दूरं दत्तं चेत् पित्तरोगिणः।
देहदार्ढ्यं भवेत्तेन धन्यो वेम! सुखी भवेत् ।।१७४ ।।

सत्यासत्यगतिं ज्ञातुं शक्ताः के वेम! चिन्तय।
क्रमात् स्थितिर्गतिर्व्यक्ता न तथा श्रुतिमात्रया ।।१७५ ।।

एकस्सत्यप्रतिज्ञायै वेम! विक्रीय चाङ्गनाम्।
हीनाचारः श्मशानोर्वी पालक स्सन्नवर्तत ।।१७६ ।।

विनयं दर्शयन् वेम! स्नेहाभ्यर्थीव सूचकः।
गर्ते क्षिपति दातव्यो नाश्रयस्तस्य दुर्मतेः ।।१७७ ।।

मद्यं पीत्वा सज्जनेषु त्यक्तवस्त्रश्चरेन्नरः।
सर्वनाशे जीर्णवस्त्रधारी स्याद्वेम! निर्धनः ।।१७८ ।।

शक्तोऽहमिति वेमेह यदि मन्येत तत्प्रथा।
शून्या भवति प्राग्दुष्टकर्मोद्घाट्य हसन्ति हि ।।१७९ ।।

वर्षाभावाद्भवेत् क्षामो वर्षाधिक्येन संप्लवः।
क्षामं च संप्लवं वेम क्रमाज्जानीहि तत्त्वतः ।।१८० ।।

आर्थिकविभागः

न पश्यति मदाद्भाग्ये दारिद्र्ये दातुमेव न।
संपद्दरिद्रता बाह्यः कालो भवति वेम! किम् ।।१८१ ।।

In Public domain. Digitization Muthulakshmi Research Academy

अनिर्गम्य कथं वेम! प्रायशोऽनृतभाषिणाम् ।
गृहेषु विश्रमेल्लक्ष्मीः भिन्नकुम्भे जलं यथा ।।१८२ ।।

स्वयं न भुक्त्वा चादत्त्वा संचिनोत्यकृती धनम् ।
मधु संचित्य सरघा न दत्ते पथिकाय किम् ।।१८३ ।।

अक्षिहीनोऽङ्घ्रिहीनश्च यथोभौ सहचारिणौ ।
तथा दरिद्राश्चान्योन्यं वेम! तिष्ठन्ति सङ्गताः ।।१८४ ।।

शाट्युष्णीशं कञ्चुकं च ताटंके चाङ्गुलीयकम् ।
यस्य लम्बोदरं तं हि वेम! कांक्षन्ति बान्धवाः ।।१८५ ।।

कामस्सोमो धनी मर्त्यः भृशं राजति तेजसा ।
वित्तहीनो नरो नूनं रिक्तो वेम! प्रवर्तते ।।१८६ ।।

दातुं गोपयितुं वेम! भोक्तुं धर्तुमशक्नुवन् ।
अविद्यो निरुपायश्च गच्छच्छव इतीर्यते ।।१८७ ।।

दारिद्र्ये लघुचित्तस्स्यात् सूता व्याघ्रीव वर्तते ।
वेम! कर्कशचित्तस्य कथं सम्पद्भवेदिह ।।१८८ ।।

भोजनादप्रियाद्वेम! भक्ष्यनष्टिरभक्तितः ।
पूजनात् पत्रनष्टिश्चापात्रदानाद्धनव्ययः ।।१८९ ।।

क्षौमाम्बराणि ताटङ्के कायपुष्टिश्च वीटिका ।
यस्य सन्तीह तं हीनमपि वेमाह्वयन्ति हि ।।१९० ।।

शिरो वस्त्रं शरीरं च मालिन्यकलितं यदि ।
वेमाग्रजन्मानमपि वदन्त्यवसरे त्युत ।।१९१ ।।

ऋणादानं मूर्खमैत्री दूष्योक्तिर्न्यास एव च ।
एह्या हरिहरादीनां वेम! नैवात्र संशयः ।।१९२ ।।

In Public domain. Digitization Muthulakshmi Research Academy

दत्ते स्वभ्रातृभिर्वेम! ममेत्येवं न चिन्तयेत्।
कृत्ते स्वपादे किं दुःखादात्मभ्राता प्ररोदिति ।।१९३।।

यदि याचेददातारं दाता भवति किं पुनः।
निमज्जितं वेम! वार्धौ दर्भस्यात्किंच चीरणम्? ।।१९४।।

अधिकोऽस्म्यहमित्युक्त्वा मार्गं गुल्मैर्निरोधयन्।
पान्थान्निहत्य तद्द्रव्ये हृते स्याद्वेम! दोषभाक् ।।१९५।।

सेवां श्रमं च बहुधा कृत्वेदं राजमण्डलम्।
न विश्वसेद्वेम! सर्पमैत्री स्यात्सहस्रशः ।।१९६।।

जडस्य शास्त्रैः किं? वृद्धभर्त्रा किं तरुणीमणेः।
यद्गेहे नास्ति शीतान्नं तत्संसारेण वेम! किम् ।।१९७।।

कृत्वा शाकलितानादावन्ते नास्तीति वादिनः।
लुब्धान् दुष्कृतिनो वेम! तेषां नाशयति व्यथा ।।१९८।।

दीनानभिज्ञभूत्या किं? किमनाश्रयबन्धुना।
वेम! व्याध्यनभिज्ञेन वैद्येनापि च किं फलम् ।।१९९।।

स्वस्य दानं सुतातुल्यं पितुश्च भगिनीसमम्।
अन्येषां वेम! यद्दानं तान्मातृसदृशं भवेत् ।।२००।।

दैर्घ्यस्थौल्ययुताङ्गोऽपि वेमोच्चैश्श्मश्रुवानपि।
न दाता दातृताहीनः नेभो हि घनकासरः ।।२०१।।

कुलवन्तो गोत्रवन्तो विद्यावन्तश्च सर्वतः।
वेमास्ति काञ्चनं यस्य तस्य दासीसुताः खलु ।।२०२।।

धनेन निष्कुलो भाति निस्स्वस्य क्षीयते कुलम्।
वेमात्यन्तं कुलान्मुख्या सम्पदेव सहस्रशः ।।२०३।।

In Public domain. Digitization Muthulakshmi Research Academy

तृणं स्यात् घृतहीनान्नं शाकहीनं श्वभोजनम् ।
प्रीत्या विरहितं चान्नं पिण्डान्नं वेम कथ्यते ।।२०४।।

स्याच्चेदल्पस्याधिकारः साध्वसाध्वपि निन्दति ।
किमिक्षोर्माधुरीं वेत्ति वेम! श्वा चर्मभक्षकः ।।२०५ ।।

याचमानोऽधमो भूमौ दैवतुल्यो ह्ययाचकः ।
यो न दत्ते याचितोऽपि वेमाऽधन्य स्स एव हि ।।२०६ ।।

हत्वा बहून् जनान् दीनान् चोरयित्वा पुराण्यपि ।
यत्र कुत्र गतं ज्ञात्वा वेम! हन्त्यन्तको ध्रुवम् ।।२०७ ।।

यदि नास्ति धनं वेम! धैर्यं किञ्चिन्न तिष्ठति ।
यद्यस्ति धैर्यं न धनं धनधैर्ये नृपोचिते ।।२०८ ।।

सम्पदा किं निष्कृपस्य? कथं श्रीर्भाति कर्मिणाम् ।
मधु सञ्चित्य सरघा वेम! याति स्ववर्त्मना ।।२०९ ।।

महानपि न गौ श्श्वा स्यात् न व्याघ्रो शशकस्तथा ।
न गजो मशको वेम! न दाता लुब्ध एव च ।।२१० ।।

दृष्ट्वात्मानं परे वेम! श्लाघेरन्निति चिन्तयन् ।
भूषणानि स्वयं धत्ते परेभ्यो हि विजृम्भते ।।२११ ।।

अजीर्णकुक्षिर्दत्तान्नं वर्जयेद्वेम! किं फलम्! ।
धनिकाय प्रदत्तानि दानान्येतादृशानि हि ।।२१२ ।।

दत्तमन्नं क्षुधार्तो हि भुङ्क्ते दैवार्पितं यथा ।
वित्तहीनाय दत्तानि वेम! दानान्यहो तथा ।।२१३ ।।

वेम! स्वयमदातॄणां धनिनां कर्मजीविनाम् ।
भिक्षापि न भवे नाः दृष्टान्तं साधु पश्यत ।।२१४ ।।

In Public domain. Digitization Muthulakshmi Research Academy

भिक्षुर्भिक्षां समाहृत्य तस्यां भिक्षां ददाति चेत्।
भिक्षादोषं हरेद्वेम भिक्षादानं समन्ततः ।।२१५।।

वेम! वित्ते बलाद्दत्ते स्वयमेति तदार्थिने।
दत्तेऽर्थिने भवेत्स्वस्मै नेहादातुश्च कुत्रचित्।।२१६।।

वेमेह स्वार्जितं वित्तं आत्मीयमिति बालिशाः।
मन्यन्ते नूनमन्येभ्यो दत्तं वित्तं स्वकं भवेत्।।२१७।।

अर्थाढ्यस्य धनं वेम! कांक्षन्ते भृशमर्थिनः।
अदत्तमर्थिने व्यर्थं व्यर्था नेति वृधा धनम्।। २१८।।

न दास्यन्ति न भुञ्जन्ति पैशुन्याद्धनिनो यदि।
अपश्यन्तश्श्रियं वेम! नश्यन्त्युत्तरजन्मसु ।।२१९।।

वेम! दारिद्र्यदावाग्निरात्मप्रान्तीयनाशकः।
निर्धनत्वे सकृद्दृष्टे स्मृते चाप्यघकारणम्।।२२०।।

आलापचतुरो वेम! द्रवीकृत्य भृशं मनः।
यदि प्रीतिं न जनयेत् परद्रव्यं लभेत किम् ?।।२२१।।

सकृदर्थी भवेन्नार्थी न दाता स्यादनेकशः।
वेमार्थिनश्च दातुश्च तारतम्यमपीदृशम्।।२२२।।

न ददाति स्वयं चान्यैरुक्तं चापि न यच्छति।
वेम! मूढ स्तुषाभोजी लब्धस्त्वन्नं ददाति किमूह्य।।२२३।।

निन्दति निर्धनं पुत्राः न स्पर्शं सहतेऽङ्गना।
वेमाहो! धनराहित्यं सर्वस्यापि सुदुस्सहम्।।२२४।।

काञ्चनं वेम! पश्यन्तः प्रशंसन्तश्च सर्वदा।
वाञ्छन्तश्चेह पश्यन्ति प्रभुं सन्त्यक्तकाञ्चनम्।।२२५।।

In Public domain. Digitization Muthulakshmi Research Academy

कान्तामरण्ये विन्यस्य चानुसृत्य मृगं गतः ।
श्रीरामः किं न रसिकः नाशकाले ह्यसन्मतिः ।।२२६ ।।

लङ्काविनाशसमये राज्यं लङ्काप्रभोर्घनम् ।
प्लवङ्गसेना चक्राम नाशायाल्पोऽलमापदि ।।२२७ ।।

जातो रामो वेम! चक्रे कुलवृद्धिं सुयोधनः ।
कुलान्तं च स्पष्टमेवं साध्वसाधु विवेचनात् ।।२२८ ।।

शुद्धदृष्टिं विना वेम! महान् शक्रोऽपि मुग्धधीः ।
मनो विक्षिप्य चासक्तः काणोऽभूत्काकवत्पुरा ।।२२९ ।।

द्राग्देशाटनमात्रेण ध्यानमात्मनि किं भवेत् ?।
यो द्रव्यार्थमटेद्वेम! तस्य मुक्तिर्भवेत् कथम्? ।।२३० ।।

कान्तायां कनके यस्य न तृष्णा भुवि नास्ति सः ।
यद्यस्ति वेम! तत्त्वज्ञः स कदापि न दृश्यते ।।२३१ ।।

लिप्तेऽङ्गे चन्दनेनापि खरो भस्मनि लुण्ठति ।
अनागरिकमर्त्यानामीदृशी वेम! वैखरी ।।२३२ ।।

यदीह ग्रासदैन्येन पीड्यन्ते वेम! पण्डिताः ।
तर्हि विद्या कथं तिष्ठे! दामकुम्भे जलं यथा ।।२३३ ।।

वेम! संचिन्त्य प्रात्रत्वं दातुस्सविधमाश्रितः ।
दुर्वचः कुरुते मूर्खो यथाहिश्चन्दनद्रुमे ।।२३४ ।।

सस्योत्पादी फलं भुंक्ते तथा वेमेह नेतरः ।
सस्योत्पादक एवेह बहुधा सौख्यवान् भवेत् ।।२३५ ।।

वेम! हेममृगो भूमावस्ति नास्तीत्यचिन्तयत् ।
त्यक्त्वा पत्नीं गते रामो देवोऽपि धनमिच्छति ।।२३६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

वेमेह हेम यस्यास्ति स कामो भीम एव च ।
विराजतेऽति तेजस्वी सर्वभ्रष्टो हि निर्धनः ।।२३७।।

इन्द्रस्य वासो हेमाद्रौ तथाप्याशा न शाम्यनि ।
किं नार्थयामास? वेम! कर्णं कनककुण्डले ।।२३८ ।।

एक एव हि कर्णस्स्यात् घनः किं वेम! नेतरः ।
दानशील इति ख्यातो दातारं कुरुते धनम् ।।२३९ ।।

कुलीनो धनवानेव धनं सर्वार्थसाधनम् ।
यस्य नास्ति धनं वेमः कुलं तस्य तु निष्फलम् ।।२४० ।।

आत्मबन्धुरिति स्नेहादानीय धनिनं स्वयम् ।
सदक्षिणं ददात्यस्मै कन्यां वेम! स्वलंकृताम् ।।२४१ ।।

सुखापादि धनं न स्यात् माता पुत्रो विरोधकृत् ।
तथाप्याहो कथं वेम! जीवनं चार्जनं विना ।।२४२ ।।

दारापत्यार्थधान्यादि सम्पद् व्याप्नोति यावती ।
कार्पासकीटकस्येव व्यथा वेमास्य तावती ।।२४३ ।।

यश्शेते क्षीरपाधोधौ च हरिर्व्रजवेशमसु ।
क्षीरं हि चकमे वेम! सर्वे परधनार्थिनः ।।२४४ ।।

धनिनो व्रणबाधापि बहुधा वेम! वर्ण्यते ।
दरिद्रस्य गृहे वृत्तो विवाहोऽपि न वेद्यते ।।२४५ ।।

गण्डिकोटे नरो वेम! खड्गधारणमात्रया ।
न स्याद्राजभटश्शत्रून् किं हन्त्यभिमुखान् युधि ।।२४६ ।।

दातुः पत्युर्वेम! पार्श्वे यद्यदाता वसेत्खलः ।
निवर्तयेद्दूषयित्वा फलद्रौ कण्टका इव ।। २४७ ।।

In Public domain. Digitization Muthulakshmi Research Academy

लङ्कापुरं श्रियो धाम विध्वस्तं स्वल्पवानरैः ।
अनुकूले वेम! काले घनास्स्युरधमा अपि ।।२४८।।

पतकस्थमणिश्रेणी स्थगिता हेम्नि शोभते ।
न तथेतरलोहेषु वेम! नष्टद्युतिर्भवेत् ।।२४९।।

प्राप्ते प्रगाढदारिद्रे यदि कुर्यादसत्क्रिया ।
ततो नश्येत् स्वप्रषिष्ठा फलं वेम! न लभ्यते ।।२५०।।

ऋणाधिक्यकरः पुत्रं हीनं यः कुरुते पिता ।
स वैरी वेम! भार्या च तथैव ह्यवशं गता ।।२५१।।

मक्षिका स्यान्मधुरुचेः कामी कामरुचेर्हतः ।
त्यागहीनो हठाद्वेम! म्रियेतार्थिभिरर्थितः ।।२५२।।

स्नानसन्ध्याजपाहारनिष्ठा बह्वीह्वस्समाचरेत् ।
वर्तते वेम! पुण्यज्ञो न दत्ते कस्यचिद्धनम् ।।२५३।।

स्नात्वा न दत्ते चेद्धर्मं वृथा किं जलमज्जनैः? ।
न मज्जत्यप्सु किं वेम! तत्रत्यो जलकुक्कुटः ।।२५४।।

न हेलयेत्सत्यसन्धान् दरिद्रैर्न विवादयेत् ।
कदाचिदपि सम्पन्नैः वेम! कुर्यान्न सङ्गतिम् ।।२५५।।

वाग्दत्तं रभसात् कृत्वा चाद्य श्व इति मोहयन् ।
श्वोऽतीते वेम! गच्छेति निष्कासयति निर्घुणः ।।२५६।।

कथंचिद्यदि भाग्यं स्यात् साधून्निन्देन्मदान्वितः ।
वेमाधिकानल्पजातिः किं विजानाति कुर्कुरः ।।२५७।।

वेमातिथ्यागतिं दृष्ट्वा भर्त्सयन्तः खलाशयाः ।
आत्मधर्मं न पश्यन्ति धर्मोऽग्रे खलु कर्मणः ।।२५८।।

In Public domain. Digitization Muthulakshmi Research Academy

मत्ताः कुर्वन्त्यकार्याणि मादकद्रव्यसेवया।
अकार्यकारिणो मर्त्यान् प्रवदन्त्यधमा इति ।।२५९ ।।

अनाश्रयो नरो वेम! व्रजेद्धार्मिकमन्दिरम्।
स रक्षति पुरा रामो विभीषणमिवाश्रितम् ।।२६० ।।

गिरयो राशयश्चन्द्रकलाश्चन्दनचर्चिकाः।
दुराशा वेम! वैश्यस्य त्वाशाऽनन्ता न तद्गतिः ।।२६१ ।।

प्राहुर्दशावतोबन्धून् मन्युर्न्यूनं च निर्दशम्।
दशा नाम भवेद्वेम! चैका धनदशा भुवि ।।२६२ ।।

आर्जयन्ति धनं वेम! मातापुत्रविरोधकृत्।
मत्वा सुखकरं किं तु धनं दुःखकरं भृशम् ।।२६३ ।।

न दरिद्राय दास्यन्ति धनं वेम! प्रभोरिव।
न सत्यै पण्यकान्तावत् न सुधायै सुरासमम् ।।२६४ ।।

दानशीलो महान् दाता निन्दकः कीटकोपमः।
यस्त्वनर्थकरो वेम! स प्रतिष्ठां न विन्दति ।।२६५ ।।

प्राग्ददाति स्वयं दाता नादाता काकणीमपि।
तृष्णाहरं जलं वेम! न तथा कुत्रचिन्मलम् ।।२६६ ।।

कन्यां धनवते दत्वा मोदन्ते बालिशा जनाः।
पूजाफलं स्थिरं वेम! यत्ना हि न तथैकदा ।।२६७ ।।

वैश्यो वाञ्छति दुर्भिक्षं परेषां रुग्मतां भिषक्।
पौरो दरिद्रो धनिकं वेमाश्रयितुमिच्छति ।।२६८ ।।

ऋणदाता प्रभुर्ह्यादौ यदि याचेत्तदा यमः।
ऋणं कृत्वा पुनर्दातुं वेम! नृणामनिच्छताम् ।।२६९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

स्नेहयुक्तो वेम! दीपः सम्यग्ज्वलति नित्यशः।
सिद्ध्यन्ति धनिनो वाञ्छा निर्धनस्य न वै तथा ।।२७०।।

अयाचितोऽपि यो दत्ते ब्रह्मज्ञानी स कथ्यते।
याचितार्थप्रदस्त्यागी वेमादाता हि लोभवान्।।२७१।।

कम्बूकतन्मोदकेभ्यः शाकाय लवणाय वा।
कुर्वते वेम! काव्यानि ये ते वित्तपराः खलुः।।२७२।।

वेम! कम्बूकलाभाय निर्गते मानवे तदा।
श्वात्ति तण्डुलकण्डोलं वैश्यवित्तं तथा खलाः।।२७३।।

नीतिर्जोतिर्विहीनं स्याद्यदि वेम! विनिर्मलम्।
कथं परं ततः सिद्ध्येत् न धनेन परं भवेत्।।२७४।।

चर्म मांसं मृतपशोः गृध्रोऽन्त्युत्खात्य वै बलात्।
वेम! तद्गृध्रसंकाशः क्रूरो गजपतिः प्रभुः।।२७५।।

वैश्या इत्यस्ति वार्तैका नासते दस्यवस्ततः।
प्रावीण्यतत्त्वं वेमैषां किं ब्रवीमि महीतले?।।२७६।।

मद्यायेव न तक्राय ददते देशिकाय च।
कुक्कुटायेव वेमार्थं पुण्यायापि स्त्रियै यथा।।२७७।।

स्त्रीमेलाय ददत्यर्थं पुंमेलाय न किञ्चन।
व्रणस्था मक्षिका वेम! पुष्पे किं जातु वर्तते।।२७८।।

परतत्त्वविदाऽनेन प्रोक्तं पद्यसहस्रकम्।
लोके पठित्वा त्यजत वेमान्तश्च बहिस्तमः।।२७९।।

भक्त्या सहस्रं पद्यानां विवेकी यः पठेन्नरः।
तस्य वेम! न चापैति मुक्तिः करतलस्थिता।।२८०।।

In Public domain. Digitization Muthulakshmi Research Academy

सामाजिकविभागः

सत्ये स्थिते ज्ञानलब्धिः लब्धे ज्ञाने ऋतस्थितिः।
द्विज इत्युच्यते वेम! ज्ञानसत्यसमस्थितेः ।।२८१।।

हृत्स्थमीश्वरमज्ञात्वा शिलानमधजीविनः।
जीवेष्वेवेश्वरो भाति किं वेमास्ति शिलादिषु ।।२८२।।

योऽशक्तश्शिष्यबृन्दाय शिवं दर्शयितुं गुरुः।
अन्धोऽक्षजूर्णतुल्यं हि ज्ञानं स्याद्वेम! तद्गुरोः ।।२८३।।

गुरुं विना नात्मविद्या न भूतृप्तिर्विना नृपम्।
गुरुं विद्यां विना मर्त्यो वेम! किं भवति द्विजः ।।२८४।।

न शूद्रता न शूद्रोऽहं द्विजोऽहमिति भावना।
अज्ञानमारकूटं किं? वेम! हेमसमं भवेत् ।।२८५।।

वेमेक्षुधन्वना सर्वे जनाश्च मथिता भुवि।
कोऽत्रभूमौ कुलीनस्स्यात् कुलहीनो जनश्च कः ।।२८६।।

कुलेष्वग्र्यं कुलं वेम! न जानन् किं फलं भ्रमैः।
यस्यास्ति निर्मलं ज्ञानं स एवाग्रकुलोद्भवः ।।२८७।।

चण्डालो न हि चण्डालः चण्डालो वेम नष्टवाक्।
तं चण्डाल इति ब्रूते यश्चण्डाल स्स एव हि ।।२८८।।

मन्त्राधिक्ये मताधिक्ये वेमा! सत्यपि भूरिशः।
ऋतादृते न सिद्धिस्स्यात् सत्यवान् वर्तते द्विजः ।।२८९।।

रामनामजपेनैव किरातोऽपि द्विजोऽभवत्।
वाल्मीकिर्वेम न कुलं घनं किं तु गुणो घनः ।।२९०।।

कापुवंशे कलौ वेम! यशःस्स्वीयं प्रपूरयन्।
चिक्षेप सकलान् धर्मान् लोकेऽस्मिन् वेमधीमणिः ।।२९१।।

In Public domain. Digitization Muthulakshmi Research Academy

परद्रव्यापहर्ता च जारश्चानृतवाद्यपि ।
वेम! निष्प्रभमात्मानं मन्यते द्विजमल्पधीः ।।२९२।।

विप्रोत्तमा वयमिति वेदाध्ययनतत्पराः ।
हसन्ति प्राकृतान्वेम! तेभ्यो दासमतं वरम् ।।२९३ ।।

यज्वा द्विजोऽहमिति यो वेषधारी यथेच्छया ।
दग्ध्वा तु मांसमश्नाति किमाधिक्यं ततो भुवि ।।२९४ ।।

भूतिलिप्तं सुराभाण्डं दुर्गन्धं नोज्झति क्वचित् ।
उपवीते धृते कण्ठे द्विजन्मा वेम! किं भवेत्? ।।२९५ ।।

बिन्दुरक्तभवं देहं अजानन्द्विजशब्दभाक् ।
यदि स्याद्वेम! निरयं निधनं च कथं त्यजेत् ।।२९६ ।।

शिवोऽस्तीति शिला वेम! नमस्यन्तो जडा जनाः ।
शिवो जीवेषु चैवास्ति न शिलासु कदाचन ।।२९७ ।।

एम्बेर्वाक्यं मतमिति मधु पीत्वान्यनामभिः ।
मांसं भुक्त्वा क्रमं त्यक्त्वा स्त्रीवशो वेम! नश्यति ।।२९८ ।।

त्यक्त्वा जातिमते गत्वा यदि योगी भवेच्छुभम् ।
स्वजातिमतबद्धस्य वेम! नीतिर्विलुप्यति ।।२९९ ।।

यज्ञोपवीतं नास्त्येव जनने मरणेऽपि च ।
मातुस्तन्नास्ति स शूद्रा स्वयं वेम! कथं द्विजः? ।।३०० ।।

पित्रन्नमिति सम्प्रीत्या काकानाहूय कर्मठाः ।
दध्वे किमस्ति काकेषु महद्भ्यो वेम! दीयताम् ।।३०१ ।।

पिण्डान् कृत्वा पितॄन् मत्वा काकेभ्यो ददतः खलाः ।
कथं पिता भवेद्वेम वायसो मलभुग्भुवि ।। ३०२ ।।

In Public domain. Digitization Muthulakshmi Research Academy

वेम! कर्मशपाषाणानानीयालयनिर्मितम्।
कृत्वा शिलास्समर्चन्ति किं स्यादुपलसेवया? ।। ३०३ ।।

उपवासी ग्रामकिटेजन्माप्नोत्यश्नुते यतिः।
दरिद्रतां वेम! शिलां प्राणी नार्हति वन्दितुम्।। ३०४।।

ब्रह्माण्डे वेम! जातानि सकलानि कुलान्यपि।
सर्वेऽपि सोदरा एव भवत्येकत्वमास्थिताः ।। ३०५।।

किं चक्रेऽन्नं? कुलं चापि तथैव वसुधा तनोः।
तदर्थं यततो वेम! नुश्चेष्टै त्यपहास्यताम्।। ३०६।।

बुद्धिः प्रशस्ता पूजाभ्यो वचनेभ्यो मनादृढम्।
कुलादपि च वेमेह प्रधानो विमलो गुणः ।। ३०७।।

शुणु वेम! कुलस्यात्र किं न्यूनाधिकगाधया।
सानुजातं कुलं सर्वं कथं ज्ञेयोच्चनीचता।। ३०८।।

चण्डालनिन्दया किं वा रक्तमांसं समं तनौ।
कुलं किं वेम! तत्त्वेन चान्तर्देहानुवर्तिनः ।। ३०९।।

चण्डालं वेम! संस्पृश्य जले मज्जन्ति पामराः।
स्वकर्मणैव चण्डालो न विदन्ति कथंत्विदम्।। ३१०।।

गुणी स्याद्यदि मातङ्ग इति वेम! न तं वदेत्।
मेने वशिष्ठो मातङ्गीं मातङ्गोऽपि गुणी द्विजः ।। ३११।।

शिलां तु प्रतिमां कृत्वा संस्थाप्य च तमो गृहे।
न भजध्वं जडोन्मत्ताः ब्रह्म जानीत हृत्स्थितम्।।३१२।।

चण्डालोऽपि न चण्डालो यद्यात्मनि मनस्थितम्।
यस्यात्मसंस्थं न मनः चण्डालः खलु वेम! सः ।।३१३।।

In Public domain. Digitization Muthulakshmi Research Academy

मितामहस्य माता च वेम! मातापितुस्तथा।
स्वमाता मातृमाता स्युः शूद्रा विप्रः कथं स्वयम्?।।३१४।।

जननी गणिका वेम! मातङ्गी चात्मनस्सती।
गुरुर्वशिष्ठश्श्रीजानेः द्विजश्शक्त्या कुलेन किम्?।।३१५।।

जन्मक्रमेण हृदये विना जातिव्यवस्थया।
यदि स्थापयते देवं वेम! सर्वेषु सोऽधिकः।।३१६।।

कुलभेदमधःकृत्य चैकपात्रान्नभोजिनः।
कृत्वान्यस्य करं शीर्षे वेम! विस्रम्भय प्रजाः।।३१७।।

आनीय पर्वतशिलाः पादैराक्रम्य सर्वशः।
टंकै स्सन्तक्ष्य ये वेम! भजन्ते ते जडाः खलु।।३१८।।

शिलोक्षाणं प्रेक्ष्य वेम! नमस्कुर्वन्ति सर्वशः।
सत्योक्षाणं घ्नन्ति दण्डैः तद्भक्ताः खलुः पापिनः।।३१९।।

मृदा लोहादिना वेम! कृत्वा च प्रतिमां नरैः।
गर्ते गृहे च संस्थाप्य देवेऽयमिति कथ्यते।।३२०।।

गतस्तिरुपतिं म्लोच्छो न दासः काशिकां गता।
रण्डा न साध्वी वेम! श्वा न सिंहो गौतमीं गतः।।३२१।।

काशीकाशीति गच्छन्ति मूढा देवस्तु तत्रगः।
किं नास्त्यत्र हृदिस्वच्छे वेम! सर्वत्र वर्तते।।३२२।।

कुक्षिस्थिते पापपङ्के गङ्गास्नानैर्निधिव्रतैः।
देवता वन्दनैश्चैव किं फलं वेम! चिन्तय।।३२३।।

स्नात्वोर्ध्वपुण्ड्रं निक्षिप्य धृत्वा काषायमम्बरम्।
वेश्यां वेम! नरोऽन्वीक्ष्य विस्मरत्यखिलं व्रतम्।।३२४।।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वतीर्थेषु यज्ञेषु शिरस्संवपनादृते।
न फलं तन्मन्त्रजलात् वेमाम्बष्ठजलं घनम् ।।३२५ ।।

वेम! क्षौमाम्बरं धृत्वा चोर्ध्वपुण्ड्रं निधाय च।
वैष्णवोऽहमिति भ्रान्तो जनान्वञ्चति मद्यपः ।।३२६।।

न सहन्ते तुच्छकार्यं नाद्रियन्ते द्विजा इति।
गणना का? कुलस्याहो वेम! मुख्यो गुणः खलु ।।३२७।।

ज्ञानं दत्वा यदि जनांस्तारयिष्यन्ति बाडबाः।
तेषां देयं महद्भाग्यं सख्यं वेमातिगौरवम् ।।३२८ ।।

वेम! भूमिपते! र्वश्या अन्येभ्यो भूमिकर्षकाः।
क्षीरोपमकुलोत्पन्ना धन्या भूपालका भुवि ।।३२९ ।।

तृणाशिपशुखादी यः स्स चण्डल इतीर्यते।
वेम! कुक्कुटभोक्तारः किं कथ्यन्ते द्विजा इति ।।३३०।।

शाकुनं तु फलं दत्ते क्षीरपक्षीति कथ्यते।
किं पक्षी वेत्ति वेमाहो! आत्मन्येव शुभाशुभे ।।३३१ ।।

वेमाजितात्माऽनात्मज्ञः वृथा पञ्चाङ्गजल्पनैः।
पौरोहित्यकरश्चेत्तत् भवेदनुचितं भुवि ।।३३२ ।।

भूत्वा द्विजकुले तीर्णः स्वयं नान्यांश्च तारयेत्।
यस्तेन वेम! को लाभो जीवितेन मृतेन वा ।।३३३ ।।

पञ्चाङ्गुलिबलाद्वेम! कर्माणि कुरुते करः।
नै को नोऽपि तथैकेन विनापैति स्वकं बलम् ।।३३४ ।।

वेम! प्रस्थमितं भूरि पीत्वा सोमलतारसम्।
धन्यं मन्याश्चरन्त्याहो! कण्ठस्थं किं तत्फलम् ।।३३५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

सर्वस्मिन् प्रापिते चैक्यं संघाते नास्ति शात्रवम् ।
न्यूनाधिकक्रमे वेम! वैरं हानिश्च जायते ।।३३६ ।।

न विश्वसेद्द्वेषधरं वेषदोषौ समौ खलु ।
पुरा वेषो रावणस्य वेम! हानिप्रदो ननु ।।३३७ ।।

प्राणे स्थिते सोपदेशो भव प्राणः कदाचनं ।
नश्येद्वेम ब्राह्मणोऽपि किं ग्रसेद्बडबानलम् ।।३३८ ।।

वेम! शुद्धान्तरङ्गस्सन् शूद्रापुत्रोऽपि मर्मवित् ।
यदि ब्रह्मपदं वेत्ति स ब्राह्मण इतीर्यते ।।३३९ ।।

नमस्कृतो वेम! विप्रो ददाति भृशमाशिषः ।
यद्यात्मशुद्धस्तास्सर्वाः नोचेत्स्यात् कण्ठशोषणम् ।।३४० ।।

भवतु ब्राह्मणो भक्तो योगी वा चेतरोऽपि वा ।
सर्वेऽप्येते ततो वेम! हन्यन्ते समवर्तिना ।।३४१ ।।

नाधमो मद्यपायी स्यात् अधमोऽनृतभाषकः ।
न ब्रूते वेम! यस्सत्यं नीचचण्डाल एव सः ।।३४२ ।।

बहुधा दासता वाच्यः लिङ्गवान् वेम! जङ्गमः ।
न वाच्यो ब्राह्मण इति तथा दशसहस्रशः ।।३४३ ।।

दर्शनेषु मतेष्वेव वेम! वर्णाश्रमेषु च ।
नित्यसक्तो यश्चरति स स्यादज्ञानवान् भुवि ।।३४४ ।।

लोकेऽनेके बुधा वेम! टीकाकृत इवाब्रुवन् ।
एकं ब्रह्मेति तन्मर्म काकाभा न विदुर्जनाः ।।३४५ ।।

वेम! जातिमतैर्बद्धाश्चालसा भावसङ्ग्रहे ।
जायन्ते च म्रियन्ते च मानवा जडबुद्धयः ।।३४६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

दैवतान्यालयानीति चिह्नं कुर्वन्ति वेम! ये ।
तद्विप्रनिन्दयालं तैः मूर्खाणां दर्शितागतिः ।।३४७ ।।

यदि सार्थकता नास्ति समाभिर्महिषीरवैः ।
वाग्भिः किं? वेम! मन्यन्ते तानुन्मत्तान् जना भुवि ।।३४८।।

हरिभक्त्यान्नदानेन लोकोऽस्मिन् सफलेऽपि च ।
स्याद्गुण्टुपल्ली मुत्ताख्यो गुणवान् वेम! सर्वशः ।।३४९ ।।

वेमर्ग्यजुर्वेदिनोऽपि नौचिती यस्य विद्यते ।
स विप्रोऽपि कथं पूज्यः? जारेव स्त्री सभर्तृका ।।३५० ।।

मूढभक्त्या शिवं वेम! पूजयित्वा किरातकः ।
मुक्तोऽभूत् पूजया किं वा स्वबुद्धिस्तत्र कारणम् ।।३५१ ।।

श्वशुरस्तु गिरिर्वेम! भार्या च गिरिनन्दिनी ।
गिरिर्धनुर्गिरिर्गेहं गिरितुल्यशिलाऽभवत् ।।३५२ ।।

वादैः किं? मतभेदैः किं? भस्मीभूता हि वैष्णवाः ।
तथा लिङ्गधरा वेम! सर्वे स्युर्मृत्तिकामयाः ।।३५३ ।।

पशुजाड्यनिवृत्त्यर्थं शक्त्यै पशुबलिं कुरु ।
इति ब्रुवन्ति वेमाज्ञाः यत्नोऽयं किं? स्वभुक्तये ।।३५४ ।।

वेम! निर्दयचित्तस्य चण्डालस्यान्तिके प्रजा ।
यदि वर्तेत नश्येद्धि न धूर्तानामभिज्ञता ।।३५५ ।।

न्यायोद्घाटनवेलायां यदि धर्मं त्यजेन्नरः ।
पापी स्याद्वेम! तद्दैवं साहाय्यं धर्मवादिनः ।।३५६ ।।

अब्रुवन्तं परे वेम! न श्लाघन्ते ततो बुधः ।
प्रतिष्ठार्थी वदेन्नित्यं भाषाप्रामुख्यविच्छिवः ।।३५७ ।।

In Public domain. Digitization Muthulakshmi Research Academy

मर्यादाक्रममुल्लङ्घ्य चरेद्यदि विपद्भवेत् ।
सदा नापैति सा वेम! दुःखं च न निवार्यते ।। ३५८।।

अहिंसा परमो धर्मो ये वेम! प्राणिखादिनः ।
तेभ्योऽपि मृतपश्वाशी वरं चण्डाल एव हि ।।३५९ ।।

वेमप्रोक्तेषु पद्येषु सन्तु दोषाः सहस्रशः ।
तथापि गुण एवास्ते वेम! प्राप्नुहि धीरताम् ।।३६०।।

सांसारिका विभागः

अन्नचिन्ताज्वरार्तोऽपि वेमान्वीक्ष्य पुमांस्त्रियः ।
ज्वलन्तं ज्वलनं दृष्ट्वा पतङ्ग इव मुह्यति ।। ३६१ ।।

स्वगुणा न निवर्तन्ते श्वपुच्छं याति नार्जवम् ।
प्रगल्भा वेम! निक्षिप्य विक्रीणाति पिटे पतिम् ।।३६२ ।।

देहे जर्जरिते वेम! दन्तेषु गलितेष्वपि ।
जरयाङ्गे वेपमानेऽप्यार्तो मोहं न मुञ्चति ।।३६३ ।।

कान्तां च कनकं दृष्ट्वा वेम! सारान्वितान् रसान् ।
गुरूणामपि चार्याणां द्रागाशा न भवन्ति किम्? ।।३६४ ।।

स्त्रीसुखं प्रेक्ष्य यश्चित्तं निग्रहीतुं न शक्यते ।
स नश्येत् कम्पितो वेम! नदीतीरद्रुमो यथा ।।३६५ ।।

भृत्या च सेवया वित्तं आर्जयित्वा भिभर्ति चेत् ।
श्लाघते शतशो भार्या वेम! निन्दति निर्धनम् ।।३६६ ।।

उन्मत्तस्यात्तवेषस्य रोगिणो योगिनोऽपि वा ।
योषितां दर्शने वेम! द्रवी भवति मानसम् ।।३६७।।

In Public domain. Digitization Muthulakshmi Research Academy

युवती या गुणवती वेम! तत्सद्म राजते।
सा दीपिका तमो गेहे तच्च देवार्चनालयम् ।।३६८ ।।

भर्तृकाले वेम! कष्टं यदि प्राप्नोति मानिनी।
पुत्रकाले सुखं भुङ्क्ते सकलं सुखं दुःखगम् ।।३६९ ।।

चोरत्वं वेम! जारत्वं व्याप्तमेतद्द्वयं भुवि।
जारायास्तु गृहे शङ्का ज्योत्स्ना चोरस्य नेष्यते ।।३७० ।।

बन्धून् विपदि वीक्षस्व भटस्यापि गुणं भये।
सम्प्राप्ते वेम! द्रारिद्र्ये गतिं पत्न्या विलोकय ।।३७१ ।।

पतिर्मथनतुल्योऽपि ससौख्यमपि जीवितम्।
नासत्युज्झति नैसर्ग्यं यथा श्वा वेम! दुग्धपः ।।३७२ ।।

यदि वेत्ति पतिर्हन्ति विपद्भवति भूवरात्।
सर्वनिन्दास्पदं वेम! कौलट्यं निरयं खलु ।।३७३ ।।

वशीकर्तुमशक्तस्स्त्रीं पश्चादित्युक्तिरज्ञता।
वृक्षः प्रवृद्धो हि नखैश्छेत्तुं किं वेम! शक्यते ।।३७४ ।।

यातिक्रामति पत्युक्तिं न सा भार्या ह्यसद्गुणा।
ललाटलिखितं वेम! तां त्यक्त्वा विपिनं व्रजेत् ।।३७५ ।।

भार्या त्ववश्या पत्युस्स्यात् मृतिर्दंशोद्यतः फणी।
देहाविष्टा पिशाची च राक्षसी ह्यात्मवैरिणी ।।३७६।।

असती शुल्कनैष्ट्यै स्यात् भटो भीतोऽन्ननष्टये।
भृतिनष्ट्यै भवेद्वेम! दासी कार्येषु कृत्रिमा ।।३७७।।

मिथ्याभिभाषिणं वेत्ति ग्रामणीस्सत्यवादिनम्।
स्वामी वेत्ति तथा वेम! भार्या वेत्त्यतिभक्षकम् ।।३७८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

सम्पन्नं पुरुषं कामं मन्यन्ते वेम! योषितः ।
पश्यन्ति कामसदृशं चण्डालमिव निर्धनम् ।।३७९ ।।

योषिल्लावण्यमसमं भ्रान्तिदं विटचक्षुषाम् ।
नेत्रे कनीनिका वेम! तत्र स्यात् पीटमर्दकः ।।३८०।।

कृमिदष्टं चापि शाकं गुरवे न दिशन्त्यहो ।
वेश्यायै ददतेऽत्यर्थं तदूनो वेम! किं गुरुः? ।।३८१ ।।

मधुरेभ्यश्च सर्वेभ्यः प्राणो मधुर एव हि ।
प्राणात्स्वर्णं ततो वेम! मधुरं तरुणीवचः ।।३८२।।

शर्करामधुपीयूषपनसेक्षुरसादपि ।
प्रेयसीवचनं नूनं वेमातिमधुरं भुवि ।।३८३ ।।

जारास्त्री कांक्षते जारान् सरसान् वेम! नेच्छति ।
गोमयाशी कृमिस्सम्यक्किं वेत्ति मधुरं गुडम् ।।३८४ ।।

किं वेत्ति शिवभक्तं श्वा जङ्घामाकृष्य दंशति ।
आपणोर्वीस्थिता दासी वेम! किं वेत्ति योगिनम्? ।।३८५ ।।

स्वनृपाले नायुधेन वह्निना परभार्यया ।
हास्यप्रवर्तनं वेम! भवेत् प्राणान्तकं नृणाम् ।।३८६ ।।

अन्वीक्ष्य सुन्दरं पुत्रमपि स्यात्स्त्री स्मरार्दिता ।
मानसं वेम! पापिष्ठं निग्रहीतुं न शक्यते ।।३८७।।

शर्करायामधोर्वेम रसालस्य च माधुरी ।
ज्ञेया नाभुञ्जतो ज्ञेया पश्यतो योषिदोष्ठयोः ।।३८८ ।।

भवेत् पुण्यसुखं पुत्रादिति कर्मीह चिन्तति ।
वारणं पतितं वेम! मशकः कथमुद्धरेत् ।।३८९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

वीथ्यां निन्देद्वेम! रुद्धा क्रोशतेऽग्रे पतिं शपेत्।
स्यात्सावलुण्ठा पिटगं विक्रीणात्यसतीपतिम्।।३९०।।

स्वभार्यां साधुशीलापि रम्भाभापि स्ववैखरीम्।
जारो नोज्झति वेम! श्वा यथा चण्डालवाटिकाम्।।३९१।।

सकामा विभवे पत्यौ दारिद्र्ये नाभिमन्यते।
जीवन्तमपि तं वेम! पश्येन्मृतमिवाङ्गना।।३९२।।

अहो चित्रं कामयन्त्रं स्त्रीबिन्दुतिलकं पुमान्।
धालदल्यं मेखलाया दृष्ट्वा वेम! विमुह्यति।।३९३।।

कान्तासु कनके चैव मुह्यन्ति खलु पण्डिताः।
योषिद्विमोचितात्मानः केऽपि वेम! न सन्ति हि।।३९४।।

दासीसङ्गो महान् दोषः वेश्यासङ्गस्त्रपावहः।
जारासङ्गस्तु वेमेह मृत्योर्मूलं न संशयः।।३९५।।

सद्वृत्तं योषितस्साध्व्याः किं विजानाति पुंश्चली।
साधुर्वेत्ति ब्रह्मनिष्ठां प्राकृतो वेम! वेत्ति किम्?।।३९६।।

सौन्दर्येण च सम्पत्त्या भूविस्तृत्या च विद्यया।
किं फलं वेम! तत्सर्वं किं पुत्रकपदादृघनम्।।३९७।।

वेमेक्षुधन्वनो बाणैः पीडितो न हि शक्यते।
संस्थातुं भूनभोमध्ये पत्नीं त्यक्त्वा कथं वसेत्?।।३९८।।

कुलीनं धनिनं चान्यं भाग्यवन्तं च पूरुषम्।
साध्वी च परमा वेम! ग्रहीतुं कथमिच्छति?।।३९९।।

अन्नाभावान्निषण्णस्य कथं वाञ्छा भवेत् स्त्रियाम्।
सर्वे मदाश्चान्नमदादेव वेम! भवन्ति हि।।४००।।

In Public domain. Digitization Muthulakshmi Research Academy

ईष्टे वीक्ष्य सतीसौख्यं गतीः कर्मसुः नेक्षते ।
सतीभ्यो न गतीर्मर्त्यो वेम! नूनं न पश्यति ।।४०१ ।।

विभक्तो दारवचसा वेम! यो भ्रातृवञ्चकः ।
स उन्मत्तश्शवपुच्छेन किं वा तरति गौतमीम् ।।४०२ ।।

यत्र स्त्रियस्तत्र केल्यः रिक्तं स्त्रीरहितं स्थलम् ।
वशा भवन्ति वेम! स्त्रीमायाकृष्टधियो नराः ।।४०३।।

तप्ते तप्ते हेम्नि वर्णः मुहुस्सङ्गे स्त्रिया रतिः ।
जरापरिणतौ वेम! मोहो लोभश्च जायते ।।४०४ ।।

स्त्रियः पुमांसोऽन्नमदादुद्रिक्तभ्रष्टबुद्धयः ।
ववृधे स्मर इत्याहुः गतेऽन्ने वेम! कुत्र सः? ।।४०५ ।।

स्वर्णाङ्गीं न यदीक्षेत ज्वरोन्मादयुतो भवेत् ।
भूताविष्टो भवेद्वेम! विवृते दन्तकुट्मले ।।४०६ ।।

स्त्रीसान्निद्ध्याद्द्रवेच्चित्तं यथा लाक्षाग्निसङ्गतेः ।
वेमैतादृग्गाढमोहः कुर्यात्कियदपि धृवम् ।।४०७ ।।

नीचां च निष्कुलां वा स्त्रीं विटस्त्यक्तुमशक्नुवन् ।
भ्रान्तस्तिष्ठति वेमान्धश्श्वेव दुर्मांसभक्षकः ।।४०८।।

मोहं गता वेम! वेश्या आगच्छन्ति किमन्तिकम् ।
धनं सङ्गेन कर्षन्ति वृथा मारी न गेहगा ।।४०९ ।।

कुलाढ्यत्वात् बलाढ्यत्वात् धनाढ्यत्वाच्च गर्वतः ।
व्यभिचारपरां विद्यां वेमाधीत्य विनश्यति ।।४१० ।।

दानप्रतिग्रहाभीष्टसम्बन्धाः पद्मिनी समाः ।
अनल्पत्वेन शोभन्ते वेम! रम्यं हि तत्फलम् ।।४११ ।।

In Public domain. Digitization Muthulakshmi Research Academy

भुक्त्वान्नं सम्यगासीनः स्त्रियं दृष्ट्वा विमुह्यति।
वेमान्नरसएवाशु तनोर्दत्ते घनं मदम् ।।४१२।।

वेमेह मातृधिक्कारः पितृधिक्कार एव च।
भ्रातृधिक्कार इत्येतान् ज्ञात्वाऽघां स्त्रीं श्चरेन्नरः ।।४१३।।

वेम! स्त्री पतिभक्त्यैव प्रतिभां याति सर्वशः।
तस्याः कीर्तिर्लोकनुता पतिभक्तिः स्त्रियो धनम् ।।४१४।।

अङ्गारेण तथाल्पेन पतिते नान्यजायया।
परिहासकथा वेम! मृत्योर्मूलं न संशयः ।।४१५।।

कोटीपूजा विनश्यन्ति परस्त्रीरतकांक्षिणः।
न नश्येत्किं वेम! तापात् नवनीतं शिखान्तिके ।।४१६।।

अन्वीक्ष्य शकुनं सम्यगूढावपि च दम्पती।
म्रियेते वेम! नेहस्तः शकुनैः कर्म किं हृतम्? ।।४१७।।

वाटीवधूनिकायास्तु किं वेम! क्रमवर्तनैः।
किं सूचकस्य सद्बुद्ध्या? किं ज्ञानेन जडात्मनाम्? ।।४१८।।

दासी दास्येव वेमाहो! न स्यात्सा स्वामिनी क्वचित्।
औचित्यं तु न तस्या स्स्यात् शुभार्थी किं मृतान्नभुक्? ।।४१९।।

श्रेष्ठा तु कुलटा वेम! नयज्ञा सततं विटम्।
वेत्ति मर्मात्मसात्कर्तुं न दासी जारिणी तथा ।।४२०।।

पीनस्तनौ दर्शयित्वा द्रवीकृत्य भृशं मनः।
हरन्ति वित्तं कान्ता स्ताः वेमानङ्गकरासयः ।।४२१।।

अनुकूलसती प्राप्तौ सतीपत्यो सुखं महत्।
यदि स्यात् प्रतिकूला सा वेम! तद्वर्जनात्सुखम् ।।४२२।।

In Public domain. Digitization Muthulakshmi Research Academy

नितम्बमुन्नतं प्रेक्ष्य कुचकुम्भौ च पीवरौ ।
अवाच्यस्थलगर्तं च वेम! मौन्यपि मुह्यति ।।४२३ ।।

प्रेक्ष्य कान्ताधरं रम्यं विस्मरेत् स्वमतं नरः ।
रूपं वीक्ष्य मनो वेम! वचश्श्रुत्वा तपस्तथा ।।४२४ ।।

काममूर्वोर्धालधल्यं पीवरस्तनविभ्रमम् ।
कचं वीक्ष्य स्त्रियो वेम! नैति किं विरहं विटः? ।।४२५ ।।

अधीत्य सर्वशास्त्राणि सर्वज्ञोऽपि मुनिस्स्वयम् ।
योषां वीक्ष्योत्सुको वेम! योगं विस्मरतीह च ।।४२६।।

ग्रामक्रोडो न जानाति सुगन्धद्रव्यसौरभम् ।
अमेध्यमत्ति साध्वीत्वं वेम! किं वेत्ति पुंश्चली ।।४२७ ।।

दत्तदेहसमा वेम! दत्ता धनवते सुता ।
समाय सरसत्वात्ता निर्धनायाति बन्धुरा ।।४२८।।

असत्यभीतः प्राग्वेम! बल्हाणस्स्व प्रियां नृपः ।
ददौ परस्मै सङ्गन्तुं बालोऽभूत् विरही च सः ।।४२९ ।।

पत्युस्सम्पद्बलं पत्न्यै निस्स्वो भर्ता निरर्थकः ।
निरर्थकं पतिं वेम! नाद्रियन्ते हि योषितः ।।४३० ।।

कान्तां विरज्य सन्त्यज्य विटः पश्चात्तु तत्स्थितिम् ।
किं स्मरेद्वेम! नोच्छिष्टपत्रं किं भुवि लुण्ठति ।।४३१।।

विटोपभुक्ता त्यक्ता स्त्री निस्स्वमाद्रियते पतिम् ।
उपानहं राशिगतां वेम! श्वा खलु भक्षति ।।४३२ ।।

मन्दं स्यात्सैरिभहलं न्यूनं वृषभलाङ्गलात् ।
मुग्धाया वल्लभो वेम! श्लाघेत जरठां कथम्? ।।४३३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

रक्ष रक्षेति कृपणो यो रोदिति शिशुर्भृशम्।
तस्मै ददाति या स्तन्यं वेम! सा पुण्यभागिनी ।।४३४।।

किं वा मौक्तिकसीमन्तै र्वितन्तोः पुण्ययोषितः।
सर्ववर्णोचिता वेम! शुनः किं शिबिकांचिता? ।।४३५।।

पत्यौ भक्तिं वेम! स्त्री न त्यजेत्सा जगत्त्रये।
मुक्तिं प्राप्नोति पतयो देवता स्सर्वयोषिताम् ।।४३६।।

भावज्ञा यदि सेवेत भार्यात्मानं प्रभुर्भवेत्।
गृहस्यापि वृथा वेम! तदभावे तु जीवनम् ।।४३७।।

कृत्वा प्रशान्तं यः कन्यादातारं भृतिदायकम्।
नाद्रियेत स वै वेम! कथ्यते कूटमानसः ।।४३८।।

पत्याश्रयेण वेम! स्यात् तरुणी पुण्यशालिनी।
तथैव पापिनी भर्तृवर्तनं स्त्रीषु वर्तते ।। ४३९ ।।

अन्यकान्ता मातृतुल्या न्यायबुद्ध्या यदीक्ष्यते।
तथा वेम! जना नित्यं न पश्यन्ति परस्त्रियम् ।।४४०।।

ऐकमत्ये सुप्रतिष्ठा दम्पत्यो र्वेम! वर्धते।
सत्यभ्यसेन्मतिं पत्युः भार्या रक्षैव तस्य च ।।४४१।।

निन्देत्सर्वानपि सदा वेम! वादपरायणा।
दत्ते हानिमकामानां धूर्ता स्त्री क्षेपणीशिला ।।४४२।।

नावस्सत्यं वार्धिमध्ये शकटस्य बहिस्स्थले।
व्यक्तं भवति वेमाहो! स्त्रीसत्यं नास्ति कुत्रचित् ।।४४३।।

अवश्यायाः स्त्रियो वैरं किं वाच्यं? कीर्तिनाशकम्।
न सन्धेयं वेम! तस्यास्सान्त्वनं कामितार्पणम् ।।४४४।।

In Public domain. Digitization Muthulakshmi Research Academy

सुन्दरोऽपि धवो वेम! यदि स्यात् वज्रसेवधिः ।
शीलविभ्राजितोऽपि स्त्री पुमांसं परमिच्छति ।।४४५।।

पुण्यास्त्री कुरुते पत्युः भक्तिं मानधनान्विता ।
आत्मनि श्लाघते वेम! विद्यादन्तर्गतं रहः ।।४४६ ।।

उपेक्ष्य पत्यौ स्वं दोषं दत्तचित्तेऽपि जारिणी ।
नैसर्गं न त्यजेद्वेम! पिष्टभुक् श्वा मलं यथा ।।४४७ ।।

असत्यवादिनी वेश्या स्वसक्तं वेम! पूरुषम् ।
द्राग्नष्टसदनं कृत्वा निस्सारयति मन्दिरात् ।।४४८ ।।

उन्मत्तं वा दरिद्रं वा पङ्गुं वा कुष्ठरोगिणम् ।
भामा बाधेत सततं वेम! दृष्टिपथं गता ।।४४९ ।।

यदि पश्येद्देहभावं बहुहेयालयं खलु ।
परस्त्रीसङ्गमो वेम! प्रत्यक्षनरकं धृवम् ।।४५० ।।

वशीकरोति पुरुषं जारा न कलहप्रिया ।
कुर्यादवाच्यवादांश्च धूर्ता वेम! निरन्तरम् ।।४५१ ।।

जालेभ्यो वीक्षितुं स्त्रीणामवकाशं न कल्पयेत् ।
यदि कुर्यु स्तथा वेम! सर्वनाशो भवेद् धृवम् ।।४५२ ।।

यदि पश्येत् रूपवन्तं पुरुषं स्त्री स्ववल्लभम् ।
पश्येन्नूनं वेम! नास्ति स्त्रीबुद्धेरवरामतिः ।।४५३ ।।

अङ्गनायास्तनुं वीक्ष्य वेम! मुह्यन्ति पुरुषाः ।
कुक्षौ मलं न पश्यन्ति तन्वा किं मलयुक्तया ।।४५४ ।।

कुड्योपमं नार्यसत्यं पुंसस्तु कटसम्मितम् ।
स्त्रीणां तु वेम! चातुर्यं पुंसः क्षोभयते भृशम् ।।४५५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

यदि भार्या गुणवती पुत्रका बुद्धिशालिनः।
तदा संसारिणो वेम! किं स्वर्गेण फलं वद ।।४५६ ।।

सत्यादोषः पतिं याति अर्थं पतिगुणे सतीम्।
दोषः पतिकृतो वेम! न सतीं प्राप्नुयात् खलु ।।४५७।।

यदा भवेद्वित्तहीनः तदा माता च पुत्रकाः।
भार्या च सुहृदस्सर्वे वेम! स्युर्वैरिणो धृवम् ।।४५८ ।।

पापी परसतीकांक्षी जिह्वाबद्धो झषो यथा।
मधुद्रव्ये वेम! लग्नाः न किं नश्यन्ति मक्षिकाः? ।।४५९ ।।

माता पिता बान्धवाश्च हिता स्सर्वे समीक्षया।
कन्यां दिशन्ति किं वेम! ददते भाग्यमुज्ज्वलम् ।।४६० ।।

योषिन्मायां विदित्वैव वेम! लम्बोदरः पुरा।
अनूढवान् बद्धकच्छः जन्मनैवाञ्जनासुतः ।।४६१ ।।

रजको वरमभ्यस्तकुक्षिविद्यात्तथैव च।
गृहदेवाच्च महिषी सुरेभ्यो वेम! जारिणी ।।४६२ ।।

औरसः खलुः सत्पुत्रः किं वेश्योत्थेन सूनुना।
वेम! त्वयि मृते दत्ते किं तिलोदकमप्यहो!।।४६३ ।।

तमोगृहं दीपिकेव गुणिनी भासयेत् गृहम्।
दुर्गुणाकलितं गेहं वेमादीपमिवाप्रभम् ।।४६४ ।।

काकनीडे पिकी वेम! निधायाण्डानि पोषणम्।
कारयेत् मर्म जानीत स्त्रीमाया ज्ञायते तदा ।।४६५ ।।

त्यक्तवत्या स्त्रियास्सङ्गं वेम! त्यक्तुमशक्नुवन्।
वोढा कटं कुटीं यावज्जीवं नैति महद्गतिम् ।।४६६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

लावण्यं योषितो दृष्ट्वा न मुह्येद्वेम! कारणम् ।
गुण एव हि भामिन्या जारिणी किं न सुन्दरी? ।।४६७।।

निस्सत्वश्श्रान्तदेहोऽपि दुर्विटस्सज्जतेऽङ्गनाम् ।
निर्दन्तः कुर्कुरो वेम! किं पश्वस्थि न दंशति? ।।४६८।।

रण्डया वर्तते यावत्तावन्मोहे निमज्जति ।
अपास्ते वेम! तत्सङ्गे आशा नश्यन्ति ता स्तदा ।।४६९ ।।

रक्षेत्कान्तां सदा भर्ता द्राङ्म्रियेतावनाक्षमः ।
रक्षाविहीना या कान्ता वेम! तत्संसृतिर्वृथा ।।४७० ।।

चित्तज्ञा या वेम! पत्न्याः प्रान्ते पत्युर्भवन्ति हि ।
भक्तिर्मुक्तिस्तथा भाग्यमचित्तज्ञां स्त्रियं त्यजेत् ।।४७१ ।।

अप्रीता कुलटा भूतं कर्माप्रीतं श्रमावहम् ।
यत्र दाता नास्ति वेम! सा पूः पैशाचवाटिका ।।४७२ ।।

आहूयमाना बहुशः कुलटा भक्तिवर्जिता ।
मृत्युस्स्यात्सदनं विष्टा वेम! ग्रसति सा न किम्? ।।४७३ ।।

भार्यावाही भवश्चित्रं यदि त्वं वहनक्षमः ।
तथैव तत्समो वेम! भूतलिप्ततनुर्भव ।।४७४ ।।

दृष्ट्वा विटान् वञ्चयित्वा गवाक्षस्था नितम्बिनी ।
विलासान् कुरुते वेम! मायाऽज्ञेया हि योषिताम् ।।४७५ ।।

वेमाकांक्ष्येन्द्रपदवीं यज्ञैरिष्ट्वा महाधनैः ।
कामिनस्स्यु र्जना नूनमक्षमा योगधारणे ।।४७६ ।।

क्षुत्तृड्भ्यां व्याकुलो बालः स्तन्यार्थी यदि रोदिति ।
त्यक्त्वा कर्माणि वेमाम्बा लालयन्त्याशु चुम्बति ।।४७७ ।।

In Public domain. Digitization Muthulakshmi Research Academy

महात्मानोऽपि विभ्रान्त्या हृत्स्थकामवशंगताः।
किमर्थं युवतीं वेम! पश्यन्ति भ्रान्तदृष्टयः ।।४७८।।

पूर्दातृहीना पैशाची वागनीतिश्शिलाक्षतिः।
कुलटा प्रीतिशून्या च वेम! स्यात्प्रेतवाहनम् ।।४७९।।

कृत्वा प्रगल्भां विस्मृत्य मूलं त्र्यक्षोऽपि चाङ्गनाम्।
न वशीकुरुते वेम! अमायेति न विश्वसेत् ।।४८०।।

खङ्गं च फलकं वेम! कराभ्यां धारयन्नपि।
न शूरस्स्यादप्रतिभः किं पुमान्? वीधिगाङ्गना? ।।४८१।।

भाग्येन लभ्यते पुंसः पुण्यास्त्री योषितः पुमान्।
उभयोरपि भाग्येन वेम! पुत्रा स्तथा हिताः ।।४८२।।

पुमान् पुत्र विहीनस्तु पुण्यलोकं कथं व्रजेत्।
वेम! पुत्रविहीनस्य कथं पुण्यं प्रवर्तते ।।४८३।।

नराः पुत्रार्थिनो वेम! चिन्तन्ति परमाशया।
पुत्रे सञ्जातमात्रे किं? कुलमुद्धरति स्वयम् ।।४८४।।

निहन्ति बालकस्वेच्छा गौरवं वेम! सर्वशः।
स्त्रीस्वेच्छा तनुते दुःखं पुंसस्वेच्छा विभूतिदा ।।४८५।।

अजाजीवस्तु मर्मज्ञो जानन्वृकगतिं सदा।
वन्ध्यां मेषीं च वेमाशु नीत्वा गन्तुं च नेच्छति ।।४८६।।

अशृण्वन् मातृरुदितं य स्स्वभार्या व्यथाकुलः।
दयते स जडो वेम! पशुश्चातारतम्यवित् ।।४८७।।

उच्छिष्टमहितं मत्वा विमुञ्चन्ति जना भुवि।
वक्त्रोच्छिष्टं कियद्वेम! नेत्रोच्छिष्टमिहाधिकम् ।।४८८।।

In Public domain. Digitization Muthulakshmi Research Academy

ऋषीणां विपिने वेम! जुगुप्सा विषयार्थिता ।
अभोगो धनिनां चैव भार्याणां चाप्यपोषणम् ।।४८९ ।।

इन्द्रोऽपि वेम! कामी सन् हीनत्वमगमत्तथा ।
मारोऽपि चाशु दग्धोऽभूत् प्रथां ब्रह्मापि मुक्तवान् ।।४९० ।।

वेमाहल्या शिला भूत्वा स्पृष्टा रामाङ्घ्रिणा सकृत् ।
कान्ताभूदिति सम्प्राहुः शिलाप्येति कृतं फलम् ।।४९१ ।।

सुतं वरयितुं वेम! कन्यकामागतां पिता ।
यद्युद्वहेत् स को धर्मः दोषज्ञोऽप्यघमाचरेत् ।।४९२ ।।

चतुर्दशसु लोकेषु ईषणमात्रसुखार्थिनः ।
वर्तन्ते वेम! कामार्ता उच्छिष्टार्थि बिडालवत् ।।४९३ ।।

यदि नेक्षेतोप्तलतां व्यतिक्रम्यावहेलिकाम् ।
निर्गच्छेद्वेम! तच्छाखा तथा स्याद्योषितो गुणः ।।४९४ ।।

जीर्णाङ्ग्याश्च क्षमावत्याः सत्या वेम! गुणोदयैः ।
कोटिलाभः किं जुगुप्स्यं जीर्णाङ्गमहिषीपयः ।।४९५।।

कण्डोले वेम! कम्बूकमस्थाप्य महिषीपयः ।
न दत्ते ताडयेत्पद्भ्यां वेश्या कांक्षति किं वृथा ।।४९६ ।।

पुरि श्वा मृगयागामी सूचिकोक्तिर्गृहान्तरे ।
उज्जृम्भते वेम! वेश्यादर्शने तु विटस्तथा ।।४९७ ।।

कैका रामस्याभिषेकं नाशयामास वै पुरा ।
सीता लङ्कापुरीं वेम! कौरवान् द्रुपदात्मजा ।।४९८ ।।

पतिधिक्कारिणी जाया सूकरी केवलं तया ।
चरिष्णुस्सूकरो वेम! लण्ठत स्तौ हि कर्दमे ।।४९९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तुते समये वेम! यदि पद्यं पठेन्नरः।
सदोषमपि निर्दोषं न किं धृष्टा रतेऽङ्गना? ।।५००।।

आध्यात्मिकविभागः

वेमनाख्यो महायोगी लोकेऽभूत् पुण्यपूरुषाः।
पूजां कुरुत वेमातो भुक्तिमुक्ती ददाति सः ।।५०१।।

ब्रूहीत्युक्तो न किं ब्रूषे? ब्रूहि मां प्रबलं वचः।
ब्रूह्याचार्य! वेम! ज्ञास्यामि भवदीयमहं वचः ।।५०२।।

तद्विस्मृतिस्स्यात्स्वालोके त्वदालोके स्वविस्मृतिः।
कथं वेम! विजानाति त्वां चात्मानं च मानवः ।।५०३।।

प्राङ्मृते र्जीववस्तूनि दत्वा जीवं तु धारयेत्।
गते जीवे ततो वेम! किं फलं जीववस्तुभिः ।।५०४।।

सत्यासत्ये नीलकण्ठो वेत्ति वारि च निम्नताम्।
पुत्रस्य जननं माता वेम! जानाति हि स्वयम् ।।५०५।।

मृषावचांसि सर्वाणि वेम! चौर्यं तथा मनः।
कियान् प्राण? कियान् जीव? शतायुर्वचने ऋते ।।५०६।।

ज्वलेत् स्नहेयुतो दीपः गतस्नेहो विनश्यति।
वासनाक्षयतो वेम! जन्मनाशो भवेद्ध्रुवम् ।।५०७।।

पापो नाम पृथङ्नास्ति विदेशे वेम! कश्चन।
स्वकर्मतन्त्र एवातो न स्यात् कर्मवशो नरः ।।५०८।।

सह नायाति जनने न नयते मरणे धनम्।
कुत्र गच्छेत्स्वयं वेम! कुत्र गच्छेदहो धनम् ।।५०९।।

In Public domain. Digitization Muthulakshmi Research Academy

कस्य देहं पोषयितुं कस्य प्राणास्तथावितुम्।
कस्य वित्तं गोपयितुं वेम! धर्मस्स्वकं धनम् ।।५१०।।

वेमाप्राणा चर्मभस्त्री श्वसेच्चेत् लोहपञ्चकम्।
भस्मी भवति निश्श्वासैः नोद्यन्त्यर्चींषि किं सताम् ।।५११।।

भ्रष्टान् भृशं भ्रंशयते विधिर्विपदि नोद्धरेत्।
नष्टं सस्यं किमुद्वीक्ष्य स्वामी वेम! प्रशंसते ।।५१२।।

अत्याशाग्रस्तहृदये भ्रमते विमतिर्नरः।
आशा शुन इव स्वास्थ्यं पुंसो वेम! न यच्छति ।।५१३।।

यस्तत्त्वज्ञस्स दैवज्ञः सर्वकामान् व्युदस्यति।
योऽत्ति रम्भाफलं वेम! सतु ग्रसति किं विषम् ।।५१४।।

यावन्न वीचयो घ्नन्ति तावत्तोयेषु बुद्बुदः।
भिद्यमाने घटे मूढा भ्रमन्ते वेम! सर्वशः ।। ५१५।।

यो हेमकारविद्यां तु वेत्ति न व्यथते हि सः।
जानन्ति विद्यया तत्त्वं ये तेषां वेम! का व्यथा ।।५१६।।

जीवभावे तु विज्ञाते वेम! न भ्रंशते मतिः।
ज्ञाते दैवे रमेत् बुद्धिः तेजस्युत्थे गतं तमः ।।५१७।।

वेमायस्स्वर्णतामेति स्पर्शेण स्पर्शवेदिनः।
कर्पूरं ज्योतिषि सुमे गन्धो मुक्तिश्च तादृशी ।।५१८।।

जपं च बाह्यपूजां च कृत्वात्यन्तमनन्तरम्।
न त्यजन्त श्छलं वेम! मग्ना स्तमसि बन्धिताः ।।५१९।।

यथोचितं चोर्ध्वलोके निराकारं निरञ्जनम्।
परमात्माऽयमित्येवं वेम! योगी समीक्षते ।।५२०।।

In Public domain. Digitization Muthulakshmi Research Academy

श्रेयो दानादिह ध्यानं ध्यानात् ज्ञानं विशिष्यते।
ज्ञानादाशा परित्यागः सर्वधा वेम! चोत्तमः ॥५२१॥

यथा दीपो निवातस्थः यथा निर्वीचिरम्बुधिः।
तथैवात्मचलो वेम! निर्विकारतया स्थितः ॥५२२॥

ज्ञाते समस्ते कलुषे मूलं वेम! शिरो नतेः।
सर्वं तत्त्वं चात्मजातं ज्ञात्वा धीरो भवेन्नरः ॥५२३॥

नारण्ये नान्तरिक्षे वा नोर्व्यां नो तीर्थभूमिषु।
पश्य शुद्धां तनुं कृत्वा वेमान्तस्स्थं विभुं शिवम् ॥५२४॥

कर्पूरसदृशं चित्तं कांक्षिणो वेम! योगिनः।
ज्ञानदीपशिखा भाति तयात्मा परिदृश्यते ॥५२५॥

इन्द्रियै स्सव्यथो मत्तः किमन्वेष्टि सदाशिवम्।
इन्द्रियाणि तिरस्कृत्य पश्य वेम! परात्परम् ॥५२६॥

कुक्षिपूर्त्यै सुधां पीत्वा क्षीरं स्मरति किं नरः।
तथा ज्ञाते वेम! तत्त्वे तदन्येन ततश्च किम् ॥५२७॥

सर्वोत्तमस्त्वौचितीज्ञः मध्यमस्सिद्धिदर्शकः।
कुक्षिम्भरिर्वेषधारी वेमाधम इतीर्यते ॥५२८॥

मुक्तिरस्ति मनस्येव मजानन्तो मनो नराः।
अशक्ताश्च मनो रोद्धुं वेम! नश्यन्ति सर्वशः ॥५२९॥

न जानाति मनोमुक्तिरिति तेनैव मोहितः।
नश्येच्चित्तं यस्य शुद्धं योगी वेम! स मर्मवित् ॥५३०॥

न पश्यामो मानसज्ञं मनोवेत्तेह दुर्लभः।
वेमान्विष्य तनौ सम्यक् स त्वां पश्यति निश्चलः ॥५३१॥

In Public domain. Digitization Muthulakshmi Research Academy

यद्यत्र तिष्ठति मनो वेम! ब्रह्म न वेत्ति हि।
तन्वालये निधाय स्वमन्तर्दृष्टिर्भवेद्धधीः ।।५३२।।

त्वद्दर्शने पूर्णतत्त्वं मायाबन्धस्स्वदर्शने।
त्वद्वेत्तै वात्मवेत्ता स्यात् वेम! नास्त्यत्र संशयः ।।५३३।।

बहुधान्वेषणेनैव वेदवेद्यो लभेत हि।
वेमान्वेष्टारमन्वेष्टि किं सन्त्यन्वेषणे चणाः? ।।५३४।।

जना योगीश्वरं दृष्ट्वा निन्दन्ते न विदन्ति तम्।
पीयूषादिरसज्ञानं वेम! पाणेः कथं भवेत् ।।५३५।।

यदि वक्त्युक्तिमर्मज्ञो बालवृद्धान्तरेण किम्?।
बालहस्तस्थितो दीपो वेमालं किं न भासते? ।।५३६।।

रसाः पृथक् षडेको हि सारस्सत्यरतिः पृथक्।
सत्यमेकं तु ऋषयः पृथक् वेमैक ईश्वरः ।।५३७।।

न त्याज्यं साधुसाङ्गत्यं अज्ञात्वा प्रकृतिं नृणाम्।
भक्तिर्नास्ति कथं मूढा भजन्ते वेम! तं शिवम्? ।।५३८।।

कथं ब्रह्मेदृगक्षिभ्यां संद्रष्टुं वेम! शक्यते।
पृथक् तदक्षिदृष्टिस्स्यात् अन्तर्दृष्ट्या तदीक्षयेत् ।।५३९।।

दुरवस्था स्स्थूणतुल्या हित्वाशा पाशवर्जितः।
वासना यो विजानाति वेम! ब्रह्म स कथ्यते ।।५४०।।

वचोभिन्नं मनोभिन्नं गुणोभिन्नस्तथास्मतिः।
कथं वा लभ्यते मुक्तिः? कथं वेम! स्वपद्धतिः? ।।५४१।।

अप्रसन्ने विभौ तन्व्याः वृथा रूपं नवं वयः।
नैपुणी वेम! मर्त्यस्य नाभाति त्वत्कृपां विना ।।५४२।।

In Public domain. Digitization Muthulakshmi Research Academy

यथातपे तमोलीनं यथा कुम्भे स्थितं जलम्।
तथा व्याप्तं वेम! विष्वक् तत्त्वं तु परमात्मनः ।।५४३ ।।

इदं ममेति यद्गेहे धनं तत्सर्वमेव च।
निक्षिपेन्मृदि वेमाज्ञो नान्ते नयति काकणीम् ।।५४४ ।।

देशवेशैर्नविज्ञेयो ह्यात्मन्यन्तर्गतो विभुः।
आवश्यकत्वं वेषस्य ग्रासार्थं वेम! केवलम् ।।५४५।।

परिणामदशा शैलवासिनः कूपवासिना।
ज्ञायते कथ? मज्ञः किं योगीन्द्रमनुगच्छति ।।५४६।।

अभ्यर्थ्याल्पसुखान्यज्ञो व्यथते बहुदुःखभाक्।
परमं तु सुखं लब्ध्वा जीवितुं वेम! नार्हति ।।५४७ ।।

व्यर्थाशा तरणोपायवारिणी कष्टकारिणी।
वेमाथ भुवि मर्त्यानां स्याद्भक्त्युदयरोधिनी । ।५४८ ।।

प्रतिष्ठां धर्ममाश्रित्य धर्मराजादयो ययुः।
योगस्तारक इत्याहुः धर्मं वेम! मनीषिणः ।।५४९ ।।

अनिच्छन् दातुमर्थिभ्यो संचिन्त्य बहुलं धनम्।
वेमान्ते नष्टसर्वस्वः पामरो नश्यति ध्रुवम् ।।५५० ।।

शृणु वेम! विवेकाख्यकुठारेणाद्भुतेन वै।
अविद्याख्याटवीं छित्वा गृहाण ज्ञानदीपिकाम् ।।५५१ ।।

क्षीरनीरक्रमं हंसो जानाति न शिखावलः।
अज्ञः कथं विजानाति? वेमेह परमं शिवम् ।।५५२।।

पश्यन्तोऽपि न पश्यन्ति मदान्धा वेम! वै मृताः।
ह्यः परह्यो गतेऽब्दे तत्पूर्वे न्यूनाः किमात्मनः? ।।५५३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

नदीं तीर्त्वोन्नतं देशं प्राप्तो नाद्रियते प्लवम् ।
योगारूढः पुमान् वेम! किमर्थं गणयेत्तनुम् ।।५५४।।

म्रियते मृद्घटसमा तनुरात्मा न कर्हिचित् ।
पृथग्रूपा वेम! घटा एकरूपो विहाय सः ।।५५५।।

माया कारा मनः पाशः भेदबुद्धिस्तु शृंखला ।
एतैर्बद्धस्य जीवस्य वेम! मोक्षः कदा भवेत् ।।५५६।।

ज्ञानतुल्यं सुखं नास्ति ज्ञानं वेम! न वेद्यते ।
ज्ञानस्य साम्यं ज्ञानं हि ज्ञानं तत्त्वं हि केवलम् ।।५५७।।

मौनं स्यादुत्तमो योगः मध्यमो मानसे स्थितिः ।
आसनादिविधानैस्तु वेम! योगोऽधम स्मृतः ।।५५८।।

धृत्वा जित्वा मनस्तस्मिन् यस्सुखी मुक्तिमेति सः ।
उप्लवन्तस्तरुं वेम! न किं गृह्णन्ति तत्फलम् ।।५५९।।

शक्नोति वक्तुमन्येषामक्षमश्चित्तबोधने ।
शक्तः कृपाणग्रहणे वेम! शूरो भवेन्न हि ।। ५६० ।।

गुरुः कतकबीजं स्यात् अघः पङ्कस्तनुर्घटः ।
तत्पङ्काधः प्रापणात् स्यात् वेम! ज्ञानसुधोदयः ।।५६१।।

वेमान्तस्थस्थिरं जीवी नोद्वीक्ष्य बहिरस्थिरम् ।
विस्रभ्याटति मुक्तिस्स्यात् स्थिरास्थिरविदो ध्रुवम् ।।५६२।।

गतं स्वप्नार्थसदृशं वर्तमानं न विश्वसेत् ।
क्षणं हि जीवितं वेम! भ्राम्यते भववर्त्मनि ।।५६३।।

को नामात्मा के स्वकीयाः विदित्वा न विदन्ति हि ।
कुधियो वेम! नश्यन्ति कार्पासकृमयो यथा ।। ५६४ ।।

In Public domain. Digitization Muthulakshmi Research Academy

ये ममार ममारेति शोचन्ते तद्विमूढता।
किं वाच्या? प्राणिनां वेम! कुतो बन्धः? कुतो मृतिः ।।५६५।।

जनने मरणे वेम! न स्वतन्त्रो हि मानवः।
आदौ न कर्ता नान्ते च मध्ये कर्तेति दुर्भ्रमः ।।५६६।।

क्वेदं ब्रह्मेति बहुधा प्रलपन्त्युन्मदा जडाः।
सर्वत्र परिपूर्णं हि ब्रह्म वेम! विराजते ।।५६७।।

पशुवर्णाः पृथक् क्षीरमेकं वेम! सुमावलेः।
जातिर्भिन्नापि पूजैका दैवमेकं स्मृतिः पृथक् ।।५६८।।

भूषणानि पृथक् वेम! हेमैकं स्यात् घटाः पृथक्।
एकः प्राणो भोजनानि पृथगेका बुभुक्षुता ।।५६९।।

नेक्षते निटलं कर्णौ पृष्ठं केशांश्च मूर्धनि।
नात्मानं वेत्ति किं वेम! तत्त्वं जानाति बालिशः ।।५७०।।

मोहजाले मुहुर्वेम! सक्तो भवति दुर्मतिः।
ततः फलं न किञ्चित्स्यात् आत्मज्ञो ब्रह्म केवलम् ।।५७१।।

शिथिले चित्तमूले स्यात् पतितः प्रकृतिद्रुमः।
शुष्यन्ति हि ततो वाञ्छा शाखा वेम! निराश्रयाः ।। ५७२।।

दूषितस्ताडितो वापि यत्किञ्चिदपि चाब्रुवन्।
तूष्णीं भावं गतो वेम! परमात्मेति वर्ण्यते ।। ५७३ ।।

अनिर्गते हि कालुष्ये न रूपं द्योतते ध्रुवम्।
तमस्यपावृते वेम! ज्ञानं नूनं प्रकाशते ।।५७४।।

जले रेखा स्थिरा न स्यात् तथेह च परे सुखम्।
मनो मुहुर्मुहुर्वेम! कामितान्यभिवाञ्छति ।।५७५।।

In Public domain. Digitization Muthulakshmi Research Academy

मिथ्याज्ञानेन किं मुक्तिर्लभ्यते वेम! दुष्क्रियः ।
न वक्तव्यो गुरुरिति गुणहीन इतीर्यते ।।५७६।।

कौपीनवन्तश्छिन्नाशाः प्रशान्ता गतमन्यवः ।
वेमातीतरहस्या ये गुरूणां गुरवो हि ते ।।५७७ ।।

आशापाशान् भृशं छित्वा न विसृज्य परं न हि ।
आहाराशावशो वेम! मूषको म्रियते खलु ।।५७८ ।।

सूक्ष्मरूपमभिज्ञाय सुखमप्राप्नुवान्युवा ।
बह्वधीते वेम! विद्याममृतां न पठेत्कथम् ।।५७९ ।।

वेम! भर्तुं स्वीयमिति कस्य स्वं देहमीदृशम् ।
कस्य स्वं द्रविणं गोप्तुं प्राणः कस्यावितुं सदा ।।५८० ।।

शिवाभक्तिर्जीववधो जीवो नाम शिवः खलु ।
अभेदं जीवशिवयोः वेम! जानीहि तत्त्वतः ।।५८१ ।।

न सिंह श्श्वा कोङ्कणगो काशिगो न गजः किटिः ।
पृथग्गुणं गतो मर्त्यः वेम! योगी न कथ्यते ।।५८२ ।।

तरणान्नास्त्यगाधत्वं मरणान्नास्ति दुर्व्यथा ।
कौपीनान्नास्ति दीनत्वं वेम! किञ्चिदपि ध्रुवम् ।।५८३ ।।
प्रौढानां चञ्चलदृशां विभ्रमान्वीक्ष्य किं भ्रमैः? ।
वेम! बाह्यानि रूपाणि किं निरीक्ष्य वृथा भ्रमैः ।।५८४ ।।

बह्वधीतेस्तर्कवादः न तत्र ज्ञानमव्ययम् ।
कोशकारः कृमिरिव वेम! तादृग्विनश्यति ।।५८५ ।।

कथं न्यूनो बलीवर्दान्महिषो वेम! केवलम् ।
नैल्यमेवात्र हेतुस्स्यादज्ञो योगी किमुच्यते? ।।५८६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

माया वेम! सुता जाया स्सुखं दुःखभवो मृतिः ।
कल्पितै तावती माया मृषा जीवितसङ्गतौ ।।५८७।।

ह्रीमन्तो वयमित्येवं वीक्ष्य वेम ममायिकम् ।
विस्मितास्स्युर्जना वेम! दैवं वेत्ति निजत्रपाम् ।।५८८।।

न वेत्ति स्वयमात्मानमन्येभ्यो बोधते कथम्? ।
पशुतुल्योऽलसो वेम! बध्नात्यर्थाय कर्मसु ।।५८९।।

बह्वधीत्य बहुश्रुत्वा नैच्यं त्यजति नाधमः ।
क्षीरेण धौतमङ्गारं नैल्यं किं वेम! मुञ्चति ।।५९०।।

पितृभ्यां दारपुत्रेभ्यो धनाय व्यथते नरः ।
वेम! ब्रह्मणि सन्दृष्टे नात्मनस्सन्ति केचन ।।५९१।।

सर्वेभ्यः पातकिन्याशा मुनयो वञ्चिता स्तया ।
वेमोद्वीक्ष्य विमुञ्चन्ति तां शुद्धात्मान एव हि ।।५९२।।

सत्यव्रतं जगन्निन्देत् सत्यं ब्रूयान्न दुर्जनैः ।
महात्मनैव सङ्गत्य वेम! सत्यं वदेन्नरः ।।५९३।।

ममेयं भूमिरित्युक्तौ वेमापहसति क्षितिः ।
धनं हसत्यदातारं भीरुं हसति चान्तकः ।।५९४।।

कान्तां च कनकं दृष्ट्वा विवोको वेम! नश्यति ।
नृणां गतिविवेकानां तत्त्वस्य महिमा कुतः? ।।५९५।।

अदतो दारुदन्तैः किं अपाणेर्वलयैश्च किम् ।
वेम! गार्दभतुल्यानां श्मश्रुभिः किं जडात्मनाम् ।।५९६।।

विधिनोक्तं न कृत्वादौ वञ्चयित्वोदरम्भरिः ।
समाधाय मनो वेम! दीनश्श्वेवेह वर्धते ।।५९७।।

In Public domain. Digitization Muthulakshmi Research Academy

महतोऽपि भवेन्मोहः तन्मोहं यतमानसः।
अधः कृत्य यदीक्षेत वेम! ब्रह्माथ दृश्यते ।।५९८।।

निराश्रया स्संयतन्तोऽप्यदातारो निरोधकाः।
शिवस्य पूजामारभ्य वेम! काश्चिन्न कुर्वते ।।५९९।।

शोधयित्वात्मनि शिवं स्थिरां भक्तिं करोति यः।
स सर्वमुक्तस्सर्वात्मा भवेद्वेम! न संशयः ।।६००।।

नश्येन्नार्हा शिवार्चा हि प्रागारभ्य न तां त्यजेत्।
विहायादौ निर्मितान्ते भित्तिः किं वेम! तिष्ठति ।।६०१।।

कष्टे स्याद्दैवनिन्दालुः आत्मश्लाघापरस्सुखे।
कारणं कष्टसुखयोर्वेम! कर्म पुराकृतम् ।।६०२।।

कामानलात् क्षुधाग्नेश्च क्रोधवह्नेरबाधितः।
वेमैकाग्रेण मनसा तिष्ठेच्चेन्मुक्तिमान्नरः ।।६०३।।

दधि तक्रं पायसान्नं नवनीतं घृतं तथा।
सर्वं क्षीरमयं वेम! ब्रह्म वीक्षस्व तत्समम् ।।६०४।।

क्षुद्रविद्यासु राज्येषु स्त्रीणामोष्ठेषु धेनुषु।
आशां मुञ्चति ये मर्त्याः मुक्तास्ते वेम! सर्वशः ।।६०५।।

किं त्वं भ्रमसि कुक्ष्यर्थं कुक्षेः तृप्तिर्मनः! कुतः?।
शिलान्तस्थस्य भेकस्य कुक्षिर्वेम! न चास्ति किम्? ।।६०६।।

प्रशान्ते मानसे शीतश्शीतांशुरिव यो मुनिः।
वर्तते वेम! सोऽत्याशु गृह्णाति परमं पदम् ।।६०७।।

आकाङ्क्ष्य मधु वेमाशु प्रविश्य मधुमक्षिकाः।
यथा निर्गमनाशक्ता मग्ना मोहाम्बुधौ तथा ।। ६०८।।

 In Public domain. Digitization Muthulakshmi Research Academy

अजानन् ब्रह्मणस्स्थानं वेमान्यत्र गवेषणात् ।
किं ब्रह्म दृश्यते! वित्तं लभ्यते किं विनाञ्जनम् ।।६०९।।

अभ्यस्तसर्वविद्योऽपि वेम! स्यान्नघनः खलः ।
जड एव घनः किं स्यात्? खरो गन्धान्वहन्नपि ।।६१०।।

छित्वा हृत्स्थानि सर्वाणि ममत्वानि दृढं मनः ।
कृत्वा शुद्धं यस्तु देहं धत्ते वेम! स तापसः ।। ६११।।

न भविष्यन्त्यभाव्यानि नाभावो भाविकर्मणाम् ।
महिमा पृथगस्त्यैव वेमास्माभिस्तु किं भवेत्? ।।६१२।।

नाहेर्जीव्यस्ति पापीयान् यथोक्तं श्रुणुते हि सः ।
मोहिनं बोधितुं वेम! शक्नुवन्ति न केऽपि च ।।६१३।।

कर्मबन्धानि पूर्वाणि छिद्यन्ते गुरुणा सता ।
वेमैकाब्दं कुलालस्य दण्डस्यैकं क्षणं घटाः ।।६१४।।

सुखार्थी पद्धती स्सर्वास्त्यक्त्वा त्वां विश्वसेन्नरः ।
भवद्विस्रम्भणान्मुक्तिर्भवेद्वेम न संशयः ।।६१५।।

मौक्तिकं पतितश्शुक्तौ स्यादप्स्वब्बिन्दुरम्मयः ।
प्राप्तं यद्यस्ति वेमेह तत्र किं न भवेत् फलम्? ।।६१६।।

असह्यं सूपहीनान्नं अनृणी स्यान्महाबलः ।
भवबन्धविमुक्तस्तु सुज्ञानी वेम! कथ्यते ।।६१७।।

मुखे दृष्टे भवेन्मोहः धने दृष्टे मनोहृतम् ।
पतिते वेम! सर्वाङ्गग्रन्थयस्स्युर्विभाजिताः ।।६१८।।

विश्वस्य मर्त्यास्स्वैश्वर्यं धर्मे कुर्वन्त्यनादृतिम् ।
वेमैत्य यमभृत्येषु ताडयत्स्विह का गतिः? ।।६१९।।

In Public domain. Digitization Muthulakshmi Research Academy

औरसे तनये हेम्नि स्त्रीष्वाशाविह्वलाशयः ।
न मुञ्चेच्चेद्भ्रमं वेम! नरो ब्रह्म न पश्यति ।।६२० ।।

छित्वा तरुलताः भित्तीः कृत्वा निर्माय मन्दिरम् ।
वेमाहं कुरुते मर्त्यो न वेत्त्यागामि दुष्कृतिम् ।। ६२१ ।।

चर्मपाञ्चालिकां कृत्वा नरो भ्रमयते भृशम् ।
वेमात्मानं भ्रामयन्तं न पश्यति कथं शिवम् ।। ६२२ ।।

भीरुः परबलं वीक्ष्य प्राणगुप्त्यै पलायते ।
कृतान्ते कुपिते वेम! निरोद्धुं केन शक्यते ।।६२३ ।।

वेमेह मृतयोः पित्रोः पुत्रो रोदिदिति दुःखितः ।
मृते भर्तरि भार्या च कार्यार्थं न हृदि व्यथा ।।६२४ ।।

स्वचेतसि स्थितां मुक्तिं योऽन्यत्रान्वेष्टुमिच्छति ।
उन्मत्त स्स हि कक्षस्थमेषान्वीषीव गोपकः ।। ६२५ ।।

नात्यन्तं दुःखमाशातः नास्थिरायां सुखं दृशि ।
चेतस्यनास्थिते वेम! मुक्तिर्नास्ति कदाचन ।।६२६।।

वेम! प्रायस्तत्त्वहीना वसन्ति जगतौ तथा ।
न तत्त्वज्ञा न दृश्यन्ते यदि सन्त्यपि तत्त्वतः ।।६२७ ।।

य इन्द्रियाणि जयति तत्त्वमात्मैव वेम! सः ।
एवं नित्यं राजयोगी राजते भूरितेजसा ।। ६२८ ।।

गेहं च मल्लकं कृत्वा दशां कृत्वा गुणानपि ।
स्नेहं कृत्वा कर्मचयं ज्योतिर्वेम! प्रदीपय ।।६२९ ।।

गणयित्वा घनाः पूजाः कृत्वा प्राप्नोति किं फलम्? ।
भक्तिं विना पूजया किं? भक्तिर्वेमेह! कारणम् ।।६३० ।।

 In Public domain. Digitization Muthulakshmi Research Academy

कान्तारेषु स्रवन्तीषु शैलेषु किमु गाथया।
चेतस्येव स्थितं वेम! न विदन्ति सदाशिवम्।।६३१।।

श्वा किं वेत्युच्चनीचत्वं? खरश्चन्दनसौरभम्।
तथाल्पो वेत्ति किं वेम! वैराग्याद्धरपूजनम्।। ६३२।।

कालत्रये शिवं तुष्ट्या योऽर्चयेत् पुण्य एव सः।
पूजां विना जातु कथं मोक्षभोगमवाप्नुयात्।।६३३।।

श्रान्ताङ्गा योगिनं मन्याः न व्युदस्यन्ति हृन्मलम्।
वल्मीकाग्रे हते वेम! म्रियते किं फणाधरः? ।।६३४।।

श्वैकान्तत्वं बकध्यानं रागं वेम! खरस्य च।
मण्डूकमज्जनं चैव न कुर्वन्त्यात्मभावनाम्।।६३५।।

अधीत्य सर्वशास्त्राणि लिखित्वापि विदन्ति हि।
न विदन्ति मृतिं वेम! किं शास्त्रैर्मृत्यवेदिभिः।।६३६।।

शैलाश्मभिरुपानीतैर्निर्मितेष्वालयेष्विह।
भ्रमन्तो यान्ति वेमार्तिं शिवे प्राणिन्युपस्थिते।।६३७।।

जगन्नियामके देवे स्थितेऽहं प्रभुरित्यहो।
वक्ति किं? वेम! नाशासेद्वन्यः किं मेदिनीं कपिः? ।। ६३८।।

चक्राङ्किता भस्मलेपाः लम्बलिङ्गानि सर्वशः।
अत्रैव मतचिह्नानि वेम! तत्र न तत्प्रथा।।६३९।।

इन्द्रियाणि स्वयं रोद्धुमशक्तो मरणोन्मुखः।
प्रव्रजेद्वेम! मुक्तिर्हि विनेन्द्रियजयं कथम्? ।।६४०।।

सूक्ष्मातिसूक्ष्ममानन्दमजानन्मतिवर्जितः।
अधीत्य वेम! मग्नस्स्यात् वेत्त्यल्पः किं? महद्रहः? ।।६४१।।

In Public domain. Digitization Muthulakshmi Research Academy

देवपूजाकृतो वेम! दिव्यभोगो भवेत्खलु ।
तत्त्वज्ञो दैवसदृशः तद्धीनस्य न सद्गतिः ।।६४२ ।।

निर्माय सदनं कर्णे वेम! वेमो महाधियः ।
चिदाकाशो मुक्तिधामेत्याह तत्प्राप्य मोदत ।।६४३ ।।

निरुद्ध्योत्पथगं चित्तं यश्शिवे कुरुते सदा ।
स वंशकृद्भवेद्वेम! नोचेत् ब्रह्मपदं कुतः? ।।६४४ ।।

यदि स्वयं सद्गुरुस्स्यात् हरं ब्रह्मजगत्तथा ।
दर्शयेद्वेम! शिष्यं स्वं स्वीकृत्य च हरेत्तमः ।।६४५ ।।

ज्ञानी युगेषु यातेषु तिष्ठेन्न प्राणविप्लवः ।
प्राणहानौ च वेमासौ लीयते परमात्मनि ।। ६४६ ।।

स्नपयित्वा च संशोध्य भिस्सां दत्वाम्बरान्वितम् ।
कृत्वा चास्मै शरीराय वेम! यान्ति क्रियच्छ्रमम्? ।। ६४७ ।।

नास्ति नास्तीति यो ब्रूते तस्य नास्त्येव वेम! सः ।
अस्त्यस्तीति स विस्रम्भं वदतोऽस्ति सहायवान् ।। ६४८ ।।

प्राभवं लोहमोहाभ्यां नश्येत्कर्मफलं तथा ।
वेमात्मचिन्तितं कार्यं दैवमन्यत्र चिन्तयेत् ।। ६४९ ।।

स्वयं न भुङ्क्तेऽन्येभ्यश्च न दत्ते स्वार्जितं धनम् ।
पुत्रार्थमिति सञ्चिन्त्य म्रियते वेम! न ब्रुवन् ।।६५० ।।

गुप्तमर्थं सतीपुत्रा वाच्छन्ति भ्रम एव सः ।
वेम! भाग्यविहीनानां लभते किं फलं मनाक्? ।।६५१ ।।

स्पर्शवेधीत्वभाग्यस्य लभेत यदि न स्थिरः ।
वृष्ट्या सहागता वेम! तिष्ठन्ति करकाश्च किम्? ।।६५२ ।।

 In Public domain. Digitization Muthulakshmi Research Academy

वेम! गर्भे निर्धनस्य सञ्जातो भाग्यवान् पुमान्।
बहुवित्तयुतोऽन्येभ्यो करोत्युपकृतिं सदा ।।६५३ ।।

वेमेह बाधा विविधा स्सोढुं शक्याः कथञ्चन ।
यमबाधा तु न तथा जीवतामुत्रतां विना ।। ६५४ ।।

सर्वसम्पत्समन्वीतो गर्वितो धर्मकण्टकः ।
अप्राप्यान्ते स्वयं श्रेयो वेम! प्राप्नोति नाशनम् ।।६५५ ।।

ममता मदमात्सर्यरूपव्यसनवर्जितः ।
योगी परं विश्वसिति वेमेहान्यहिते रतः ।।६५६ ।।

दानं धर्मो दया सत्यं नीतिर्धैर्यं वदान्यता ।
राजयोगा इमे वेम! भवेयुर्मेदिनीपतेः ।।६५७ ।।

वेम! रात्रिं दिवं भावमात्माहमिति संस्मृतिम् ।
विस्मृत्य वर्तते यस्तं त्वं विद्ध्युत्तमयोगिनम् ।।६५८ ।।

मृदि दारुषु लोहेषु शिलाकुड्यपटेषु च ।
प्रतिमासु तथात्मानं बोधितुं वेम! न प्रभुः ।।६५९ ।।

आरभ्य जन्मनो वेम! पापं ज्ञात्वा सदा पुमान् ।
अपशुर्जरयाग्रस्तो वेम! योगीव सञ्चरेत् ।।६६०।।

ज्ञाने प्राप्ते स्थिरं चित्तं ज्ञाते दैवे वशा मतिः ।
उदितं भास्करं वीक्ष्य वेम! तिष्ठति किं तमः? ।।६६१ ।।

यस्तु विद्याचित्तसंस्थमाहुस्तं योगिनं बुधाः ।
त्वयि ज्ञाते त्वया वेम! त्वमेव शिव उच्यसे ।।६६२ ।।

तपस्वि निम्बाद्यङ्घ्रिपाश्च मूलिकाकार्यकारिणः ।
प्रजानां वेम! किं नीचः? निर्दयात्मोपयुज्यते ।।६६३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

कृथैति नारकं कूपं विनश्यति गुणः कृधा।
कृधैव वेम! सर्वेषां जीवनं लाघवं व्रजेत् ।।६६४।।

यावद्धस्तः प्रसरति तावद्गृह्णन् हतप्रजाः।
रक्षां यदि न कुर्वीत वेम! तस्य जनिर्वृथा ।। ६६५ ।।

ये मनोनिग्रहचणास्ते हि मुक्तिपथं गताः।
उप्लवन्तस्तरुं वेम! न किं गृह्णन्ति तत्फलम् ।।६६६ ।।

न सन्ति साधवो भूमौ बहवस्सन्ति दुर्जनाः।
काञ्चनं नास्ति वेमात्र लोपः किं भस्मनो भवेत् ।।६६७ ।।

न पाशमुक्तो ह्याशा वा न मुक्तो न मुनिर्भवेत्।
अमुनेर्वेम! मोहास्तु नापयान्ति हि सर्वदा ।। ६६८ ।।

नरा दैवपरान् वेम! मन्यन्ते स्वसमा इति।
गूढं तत्त्वं न जानन्ति मर्मज्ञाः कथमीदृशाः ।।६६९ ।।

वेम! त्वत् स्थानविन्मर्त्यो मार्गं नोज्झति सर्वशः।
अचञ्चलपदो नूनं स्थानं तव विशेन्नरः ।।६७० ।।

त्वयि स्थितेऽखिलं नास्ति मृगतृष्णोपमं स्थितौ।
त्वमेव निश्चयं वेम! निखिलं माययावृतम् ।।६७१ ।।

परपुष्टो वने सम्यक् संकूजति यथा तथा।
वक्त्यार्यो वेम! धूर्तस्य वाक्यं काकरुतोपमम् ।।६७२ ।।

ज्ञानिनो वयमित्येवं मत्वा वेम! कुबुद्धयः।
अनात्मज्ञा भवन्त्यज्ञाः कष्टे तिष्ठन्ति कानने ।। ६७३।।

वेत्ति योगी पापपुण्यं किं वेत्ति पशुपालकः?।
अन्तर्योगं प्राप्य वेम! लोहसङ्गधनं कुरु ।।६७४ ।।

In Public domain. Digitization Muthulakshmi Research Academy

वेम! श्रुत्वा महद्वाक्यं तथा कर्तुं न शक्यते।
कुर्याच्चेद्व्याघ्रमन्वीक्ष्य लिप्तजम्बुकवद् भवेत्।।६७५।।

किमसम्बद्धसख्येन पुंसो वेमेह धीमतः।
कार्यार्थिनः किं हठेन? दैवभक्त्या खलस्य किम्?।।६७६।।

अद्य वा श्वः परश्वो वा शिवार्पितमनास्सुधीः।
शिवो भर्ता भवेद्वेम! स्वयं कर्ता हि मानवः।। ६७७।।

आजगाम किमानीयः? किं गृह्णन् वेम! गच्छति।
जनने मरणे गच्छेत् कुतो वित्तं कुतस्स्वयम्।। ६७८।।

वक्त्रोच्छिष्टं कुक्षिमलं न शुद्ध्येद्ब्रह्मजेन वा।
यद्यस्ति सूनृतं किञ्चित् वेम! सिद्ध्यति तद्भुवि।।६७९।।

छिन्नाशो वेम! शान्ताग्निर्बद्धकौपीन एव च।
निराशीरुज्झितक्रोधः पुमान् योगीति कथ्यते।। ६८०।।

जनस्य गुणहीनस्य गुणानां गणनेन किम्?।
निर्बुद्धेः पूजया किं वा मन्त्रैः किं वेम! दुर्मतेः।।६८१।।

धर्मसत्यपथालम्बी यो नरो न प्रवर्तते।
नाप्नोति न शुभं वेम! साधुचित्तो भवत्समः।। ६८२।।

गतासवो वेम! ये स्युः ये स्युरत्रामृता जनाः।
मृतजीवा जना ये स्युः तां स्तान् सम्यग्विमर्शय।। ६८३।।

शिवोपमस्साधुचित्तः कपटश्शलभोपमः।
निश्चयात्मा महायोगी वेम! नूनं भवत्समः।।६८४।।

युक्तायुक्तानभिज्ञो हि वेम! मूढजनस्तथा।
साधुनिन्दां करोति श्वा मृगेन्द्रं भषते यथा।।६८५।।

In Public domain. Digitization Muthulakshmi Research Academy

कुशलान्कुर्वते वेम! साधवोऽकुशलान् जनान् ।
न तथा दुर्जना दोषा नारोपन्ति गुणेष्वपि ।। ६८६।।

किं? धूर्तस्य परध्यास्यिाद्भक्तिमार्गेण वापि किम्? ।
वेम! किं परमार्थस्य तत्त्वेनेह मनागपि ।।६८७ ।।

औचित्यवान्नरो नित्यमुद्योगीसन् समर्थतः ।
वेमान्येभ्यश्शक्तिकाले चोपकृत्येह रक्षति ।।६८८ ।।

कान्तां च कनकं वेम! संवीक्ष्य हृदि यो नरः ।
मोहं नाप्नोति लोकेऽस्मिन् स योगी परमो मतः ।।६८९ ।।

उद्धत्या नेक्षते मृत्युं तत्त्वं तनुमदेन च ।
भोगवाञ्छासमाक्षिप्तः पुण्यं वेम! न पश्यति ।।६९० ।।

न बाधते यदि बहूंस्तस्य दानफलं भवेत् ।
न भवेद्यदि तन्नाशी वेमैत्युद्वाहकृत्फलम् ।।६९१।।

मेषं स्वकक्षे निक्षिप्य गोपोऽन्विष्यात् यथा व्रजे ।
तथा हृत्स्थं वेम! दैवं त्यक्त्वान्यत्र भजेज्जडः ।।६९२ ।।

उन्मत्तस्यातिविनयाः सावलुण्ठा च पुंश्चली ।
कौलटेयो वेम! सम्यगाचारं कुरुते सदा ।। ६९३ ।।

भक्तः फाले वृको वक्त्रे भूतं चित्ते च यो भवेत् ।
दृष्टं ब्रह्मेति तस्योक्तिः वेम! लज्जाकरा न किम् ।। ६९४ ।।

किं देहलिप्तया भूत्या कुर्यान्निष्ठां सदाशिवे ।
अनारतं खरो वेम! किं भस्मनि न लुण्ठति ।।६९५ ।।

मेषाः पर्णाशिनस्तेषां कायसिद्धिर्न सिद्ध्यति ।
लोकास्सर्वे तथा वेम! कुर्वन्त्युन्मत्तचेष्टितम् ।।६९६ ।।

 In Public domain. Digitization Muthulakshmi Research Academy

जटाभिर्वेम! मुण्डैश्च भस्मलेपैश्च सर्वशः।
भाषणासनवेषैश्च न योगी ह्यजितेन्द्रियः ।।६९७।।

वेमेह मुण्डितं शीर्षं वेषभाषा दधत्यहो।
यदि मुण्डानि शीर्षाणि सङ्कल्पाश्चापि किं तथा? ।।६९८।।

नमयित्वा पाणिपादं वायुपूर्णः पतन् स्थितः।
वेमसनाद्यास्स्युर्विद्या अभ्यासेन कृता भुवि ।।६९९।।

काषायधारी योगीव स्थितः कामान् मुहुर्बहिः।
विक्षिप्य वर्तते वेम! यस्स मयी मुनिर्ध्रुवम् ।।७००।।

जाताः कलावनुत्तीर्णाश्श्रान्तदेहाः घनं तपः।
कुर्वन्ति किं फलं तेन? किं तत्त्वं वेम! वेद्यते ।।७०१।।

गृहान् दारान् परित्यज्य विहायान्नादिके स्पृहाम्।
एकाकी बद्धकौपीनस्तत्त्वं वेम! लभेत किम्? ।।७०२।।

कुर्वाणस्य प्राणिपूजां चिन्ता स्यात्किं शिलादिषु?।
आस्वादिते मधुरसे तिक्तः किं वेम! रोचते ।।७०३।।

बुद्धिहीनो रजो वृत्त्या चानीयोपलविग्रहम्।
पूजते वेम! भावे स्वे परं ज्ञातुं न पारयेत् ।।७०४।।

वेश्या तुल्या वेदविद्याः कुर्वन्ति भ्रान्तिमस्फुटाः।
एकैव गुप्तविद्या स्यात् वेम! तुल्या कुलस्त्रिया ।।७०५।।

सर्वव्रतानि वेमेह कायक्लेशकराण्यहो।
न दर्शयन्त्यात्मतत्त्व महान्योग्यात्मतत्त्ववित् ।।७०६।।

सम्यङ्मुण्डितशीर्षाणि कम्बलानि सितानि च।
भस्मलेपा स्तनौ वेम! तादृग्वेषाश्च कुक्षये ।। ७०७।।

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थाः जटाः कक्षपाला वेत्रं च व्याघ्रचर्म च।
भाराय केवलं वेम! मोक्षो नास्ति ततः खलुः ।। ७०८ ।।

कृतासनः पीडिताङ्गः योगाभ्यासी नमत्तनुः।
किञ्चिद्व्यायामकृन्मल्लात् वेम! न्यूनत्वमाप्नुयात् ।।७०९ ।।

निमील्य नयने कुक्षिं निष्पीड्य कृपणो यतिः।
किं कुर्यात् रुद्धकायस्सन् वेम! मेषो यमान्तिके ।। ७१० ।।

ऐहिकं वेम! सन्त्यज्य फलमस्तीति ये जनाः।
ब्रुवते तन्मतं मिथ्या परमस्तीह पश्यत ।। ७११ ।।

विनैव लिखितं वेम! न दत्ते वरमीश्वरः।
विना कर्म न लेखा स्यात् कर्तात्मा लेखको विधिः ।।७१२ ।।

अपश्यमिति दुर्मेधा वेम! कर्माधिकारतः।
अनुसृत्य विनष्टस्स्यात् चित्खे मुक्तिं न पश्यति ।।७१३।।

निर्मलोऽप्यात्मनो वेम! गुणं देवाय यो गुरुः।
न ददाति स दुर्मेधा अन्धाश्वारूढवद्भ्रमेत् ।।७१४ ।।

पुंश्चली वेम! कुर्वन्ती जारे रक्तिं स्वभर्तरि।
मुखप्रीतिं यथा कुर्यात् मुक्त्यै देहे तथा यतिः ।।७१५ ।।

आत्मतत्त्वं शरीरस्थं वेमाजानन् बहिः पृथक्।
अस्तीत्यन्वेषणे नालं किं दीपेन? स्थिते रवौ ।।७१६।।

म्रियमाणान् नरान्वीक्ष्य ध्रुवो मृत्युरिति स्मरन्।
ज्ञात्वा वेमात्मनस्तत्त्वं भक्तस्स्यादकुतो भयः ।।७१७ ।।

वेम! पाञ्चालिकाजीवी क्रीडां पाञ्चालिकागणैः।
कारयिष्यति दैवं च कुर्यात्प्रच्छन्नतस्तथा ।।७१८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

यस्य नास्ति वचश्शुद्धिश्चण्डालः खलु वेम! सः।
दानेन किं विना प्रेम्णा? फाले भक्तो मुखे वृकः ।।७१९ ।।

परमे चर्मकुक्षिस्थे राशिं दृशदि कुर्वते।
यदि देवश्शिलैव स्यात् राशिं नाश्नाति वेम! किम् ।।७२० ।।

यो वेमाशक्तमात्मानं ब्रूते कोविद एव सः।
न तथान्य उदासीनो भवेत्सर्वोत्तमोत्तमः ।।७२१ ।।

नेच्छेद्वेमाङ्गनानङ्गगेहानन्दैकलम्पटः।
ऊर्ध्वलोकं कथं श्वाऽन्नं वेत्ति? चण्डालवाटकाः ।। ७२२ ।।

वेमाटित्वा सर्वभूमिं यततोऽपि नरस्य च
फलं प्राप्त्यनुसारं भूः न वाप्येवं न भुक्तयः ।।७२३ ।।

धृत्वा कपटवैराग्यमसंयतमना नरः।
वेम! कांक्षति तन्वङ्गीं वृथेदृग्जन्म जीवितम् ।।७२४ ।।

वेमातिक्लान्तदेहेन धृत्वा काशीजलं नर।
असुखशुष्कसर्वाङ्गो मृतो मुक्तिं लभेत किम्? ।। ७२५ ।।

किं वेदाध्ययनेन स्यात् किं? परिव्रजनेन च।
किं वेम! षण्मतग्लान्या? जानीतात्मनि तं शिवम् ।।७२६ ।।

वाञ्छा मनसि जायन्ते न मुक्तिस्तासु विद्यते।
मनो ब्रह्मेत्यजानन्तो वेम! मुह्यन्ति मानवाः ।।७२७ ।।

अधीताखिलशास्त्रोऽपि मुक्तिं न लभते खलः।
यथा हसन्त्यां शयितः स्मरेच्छ्वा वेम! तत्तथा ।।७२८ ।।

मातृगर्भच्युतस्यास्ति नादावन्तेऽपि चाम्बरम्।
मध्यकाले धृते वस्त्रे वेम! हास्यास्पदं हि तत् ।।७२९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

यावत्स्वं वेम! नेक्षेत तावज्ज्योतिः प्रयोजनम् ।
दृष्टे द्रव्ये ज्योतिषा किम्? वपुषा किमधीश्वरे ।।७३० ।।

खं ब्रह्मेति वदन्त्येके कथं ब्रह्म भवेन्नभः? ।
नित्यशो वेम! भावे तु खाकारे ब्रह्मणि स्थिते ।। ७३१ ।।

आतपच्छाययो रीतिं ज्ञातुं शक्नोति यो भुवि ।
तिष्ठेदेकत्र वेमेह भ्रमेत्कुक्षिम्भरिर्यतिः ।। ७३२ ।।

यदि कर्मगुणातीतो न चरेत्तत्त्ववित्कथम् ।
भवेत्तैलं विना वेम! दीपो ज्वलति किं तिलैः? ।।७३३ ।।

शाबापहासकार्यण्डमिव मूर्खजना वृथा ।
अजानन्तस्सतां शक्तिं वेम! गर्हन्ति केवलम् ।।७३४ ।।

भूतिं लिप्त्वा जटा धृत्वा वेम! वेषधरो भवेत् ।
नाप्नोति मुक्तिं सम्बद्धः कटो नैति कवाटताम् ।।७३५ ।।

निगृहीतं मनो वेम! प्रधानमिति भावयन् ।
तन्निग्रहविधिज्ञस्त्वं पूर्णं पदमवाप्नुहि ।।७३६ ।।

अञ्जने नात्मनि द्रव्यं दृष्ट्वा यो वेम! वर्तते ।
स योगी कालवन्नीडे कुक्कुटः खलु कूजति ।।७३७ ।।

ऋषिभिश्चानभिज्ञातो विशेषो नास्ति भूतले ।
अर्थोऽनुवर्तते तेषां वाचं वेमेतरे जडाः ।।७३८ ।।

श्रुतिस्मृतीतिहासानां टीकां कुर्वन्ति नीरसाम् ।
वेदान्तसारं विस्मृत्य वेमेह! न वदन्ति किम्? ।।७३९ ।।

कुम्भः कुण्डेति वेमाद्रिः कोण्डेति लवणं तथा ।
उप्पित्युक्तिस्समातत्त्वमेकं भाषास्तु भिन्नधा ।।७४० ।।

In Public domain. Digitization Muthulakshmi Research Academy

यद्यस्त्ववकरश्चेक्षु वने नश्ये न तद्रसः।
अज्ञे वेम! स्थिते प्रान्ते यथा ज्ञानं विवेकिनः ।।७४१ ।।

पाठकस्य मतेर्वेम साधकस्य मतिर्वरम्।
वेदैर्वादिश्च किं? देहशुद्ध्या पश्येत्परं प्रभुम् ।।७४२ ।।

वेम! ज्ञात्वा जीवभेदमनष्टा ब्रह्मतां गताः।
राजन्ते स्यात्किमम्ब्वद्धा मौक्तिकीभूतवाः पुनः ।। ७४३।।

षट्स्थूणसुदृढाधारं स्थाप्यैकस्तम्भमन्दिरम्।
मन्दिरस्य स्वयं कर्ता वेमैको भुवि राजते ।।७४४ ।।

आदौ दृष्टे स्वयं वेम! सर्वत्रास्ते तदादि च ।
द्रष्टुं कोऽपि न शक्नोति स्यान्मुक्तिपथ आत्मनि ।।७४५ ।।

स्वर्णविद्येह सुखितुं ब्रह्मविद्या परत्र च ।
तदन्यविद्या स्सकला निष्फला वेम! चिन्तय ।।७४६ ।।

वेमाखुग्रहणेनैव मार्जालो न हि तृप्यति।
कुक्कुटग्रहणापेक्षी कुतो मुक्तिस्स्पृहावतः? ।।७४७ ।।

दारापत्यार्थधान्यादि सम्पद्व्याप्नोति यावती।
कार्पासकीटकस्येव व्यथा वेमास्य तावती। ७४८ ।।

रोगार्तो देवताभक्तश्शूरस्याच्छरवर्जितः।
ब्रह्मचारी भवेद्वेम! वित्तहीनो जनो भुवि ।।७४९ ।।

कथं निदानं वेत्त्यल्पो वक्तुं नार्हति दोषदृक्।
श्वा पातयति कुम्भौघं वेम! जालं तथा कृतौ ।।७५० ।।

नरोऽपराधी पारोक्ष्ये प्रत्यक्षे साधुवच्चरेत्।
यद्यन्ये तन्न जानन्ति वेम! किं वेत्ति नेश्वरः? ।। ७५१ ।।

In Public domain. Digitization Muthulakshmi Research Academy

क्रमं तत्त्वस्य विज्ञाय वेम! नैर्गुण्यमास्थितः ।
शब्दार्थज्ञोऽपि यो मौनी परात्मेति न कथ्यते ।।७५२ ।।

सत्यज्ञस्सुजनो वेम! परेभ्यस्तदृतं वदेत् ।
न गोपयेत्किञ्चिदपि नापरं च वदेद्वचः ।।७५३ ।।

जननी पार्वतीदेवी जनकः परमेश्वरः ।
बान्धवास्तद्गणाः वेम! कैलासो जन्मभूर्ध्रुवम् ।। ७५४ ।।

अस्थिरं तनुवित्तादिसर्वं चेति स्वयं विदन् ।
परान् बोधति यो वेम! परमात्मा स संयमी ।।७५५ ।।

मूर्धनि ब्रह्मणश्छित्वा विक्षिप्ते वेम! देवताः ।
रोद्धुं न शेकुर्नाशं हि यान्तीशस्य कृपां विना ।।७५६ ।।

आढ्योहमिति यो वक्ति निर्लज्जं दुर्विकत्थनम् ।
तं याति नेहाभ्युदयः परत्र च मृतिं गतम् ।।७५७ ।।

त्वयि ब्रुवति वेमेह मानवो नित्यपूजितः ।
त्वय्यब्रुवति निद्रालुः त्वदुक्तिं वेत्ति निर्मलः ।।७५८ ।।

यथा मर्मगृहे वेम! वस्त्रे कुक्षौ च मातरि ।
वेत्तुं शक्तस्तथा मर्त्यो न स्यादीश्वरमर्मविद् ।।७५९।।

धृत्वा काषायवसनं स्थित्वा योगीव यः पुमान् ।
रात्रौ त्यक्त्वा चरेद्वेम! चद्मयोगी स कथ्यते ।।७६० ।।

रत्नभूषान्विता वेम! कण्ठसूत्रं विना सती ।
न भाति हि तथा दुष्टो विद्याऽढ्योऽपि न शोभते ।।७६१ ।।

वेम! दानेषु सर्वेषु चान्नदानं महाधिकम् ।
गानेषु सामगानं च ध्यानं ध्यानेषु शूलिनः ।।७६२ ।।

In Public domain. Digitization Muthulakshmi Research Academy

तुषायामस्ति वेमान्नं द्रुमे च मधुरं फलम्।
शोधिते मारुते सम्यक् मुक्तिश्च परिलभ्यते ।।७६३ ।।

परद्रव्येषु यस्तृष्णां जहाति स हि पुण्यवान्।
वित्तं परेषां वेमोर्व्यां बहुधा पापसञ्चितम् ।। ७६४ ।।

प्रौढाङ्गना नागरिकाः पल्ल्यां शक्ता न जीवितुम्।
तथा वेमात्ममार्गे च न शोभन्ते हि भोगिनः ।।७६५ ।।

मातापित्रोर्दरिद्रेषु विस्रब्धेषु तथा नृषु।
वेम! प्रभुषु चात्यन्तं भयभक्तियुतो भव ।।७६६।।

यन्तमन्त्रप्रथां वेत्ति वह्निस्तन्त्रप्रथां तथा।
मन्त्रवादी च वेमैवं भोक्ता तिन्त्रिणिकाप्रथाम् ।।७६७ ।।

नाप्तस्सन्निहितश्चेति बन्धुर्विस्रम्भभाजनम्।
बन्धुरात्मात्मनश्चैव वेमात्यन्तं समाहितः ।।७६८ ।।

निर्व्रीडो न शिवानन्दी दुर्विनीतो न निस्त्रपः।
लज्जां त्यजति यो वेम! चिरकालं स जीवति ।।७६९ ।।

लज्जा तमश्छटा क्षुच्च गुप्तनिद्रापि चात्मनि।
वेम! कुत्र विलीयन्ते सम्यग्जानीत तद्रहः ।। ७७० ।।

वेदान्तवेद्यस्स्याद्वेम बहुधा नाशितव्यथः।
रतिज्ञो रमणः कान्तासक्तस्संसारवान् यतिः ।।७७१ ।।

सुदृढा शृङ्खला भार्या शिशवो वेम! कीलकाः।
कारागारं च संसारमेवमात्मनि चिन्तय ।।७७२ ।।

जुगुप्साकारि कामिन्यां प्रेम वेम! दिनेदिने।
मातरि ज्योतिषि प्रेम समं गौरवदायकम् ।।७७३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

ज्ञातारं वेम! नेतारं मत्वा विनियतो नरः ।
नीतिं विद्यात् ज्ञानिलाभे किं फलं त्वस्त्यवेदिनः ।।७७४।।

देहद्युतौ न गणना सिद्धानां मानसं ततः ।
राजते वेमोपरिष्टात् पनसस्यास्ति का प्रथा? ।।७७५ ।।

न त्याज्यं साधुसाङ्गत्यं विना प्रकृतिवर्जनात् ।
न फलं वेम! किं बीजं? स्याच्छलाटुनिकृन्तनात् ।।७७६ ।।

नवनीतं करे धृत्वा घृतकाङ्क्षी पुमानिव ।
अन्यत्र दैवं स्मरति वेम! दैवमपि स्वयम् ।। ७७७ ।।

न चास्ति वेषो विस्रभ्यो नात्तुमन्नं च चाम्बरम् ।
तथापि किं न वेत्त्यज्ञो वेम! विश्वमयं विभुम् ।।७७८ ।।

श्रोतुर्द्रष्टाऽधिको वेम! द्रष्टुश्चापि सुसङ्गतः ।
उन्नतादुन्नतो भूमावेवं मर्त्यः प्रवर्तते ।।७७९ ।।

रूपपक्षे नाम रूढं नामपक्षाश्रिताः क्रियाः ।
नामरूपक्रियाणां तु नाशोऽन्ते वेम! सम्भवेत् ।।७८० ।।

रजोवृते राज्यभारे नश्येदुभयतोऽक्षमी ।
जलस्योपरि तिष्ठेत्किं? वेमाऽयोगोलको मनाक् ।।७८१ ।।

भवोऽब्धिर्मकरी भार्यास्युर्जलूकादयोऽर्भकाः ।
अस्मरन्तो भवहरं वेम! केऽपि न पारगाः ।।७८२ ।।

जीवे गते पाशबन्धैस्तनुं बध्नन्ति बान्धवाः ।
दर्शयन्तो वेम! दुःखं तेन नैकोऽपि गच्छति ।।७८३ ।।

सतीपतीनां नगरे मोहोहाः क्रमशोऽधिकाः ।
मुक्तेर्मार्गं वेम! लब्धुं न युक्तिं च विदंति ते ।।७८४ ।।

In Public domain. Digitization Muthulakshmi Research Academy

भारतः पञ्चमो वेद इति निर्बुद्धयो जनाः ।
स्तुवन्ति किं? वेम! हिंसा द्रष्टुमिष्टमभूत्कथम्? ।।७८५।।

जलस्पृष्टाग्निरङ्गारो घटस्थजलमग्निना ।
सन्तप्यते पश्य वेम! महच्चित्रमिदं खलु ।।७८६ ।।

सम्मार्जयित्वाऽलङ्कृत्य गेहं देहाख्यमन्वहम् ।
सिद्धं कृत्वा विसृज्यान्ते वेम! जीवो व्रजेत्ततः ।। ७८७ ।।

विश्वनाथे च विप्रेषु वेदोक्तेषु विभावपि ।
यस्य नास्ति धृवा भक्तिः पापात्मा खलु वेम! सः ।। ७८८ ।।

रम्यं हि खगसौन्दर्यं स्फुटं दृष्टासु पङ्क्तिषु ।
किं वेम! दैवादत्तेन सौन्दर्येण? विमूढ! ते ।। ७८९ ।।

कुक्षौ मलमथास्थीनि मांसं चर्मपरिच्छदम् ।
मलभस्त्र्यां कथं वेम! मानसं परिषज्जते ।।७९० ।।

अच्छित्वाशालता वेम! मग्ना मोहार्णवे जडाः ।
वाराणस्यां वसन्तोऽपि ते मुक्तिं नाप्नुवन्ति हि ।।७९१ ।।

पक्षैः पुच्छैश्च वस्त्रैश्च लोकस्याच्छादनं विधिः ।
कृत्वैतां वेम! मर्यादां मानगुप्त्यै न्यवेदयत् ।। ७९२ ।।

हृदि पश्य शिवं सम्यक् गुप्त्यै घण्टापथं हि तत् ।
अक्षमालाजपो वेम! भुवि पाटच्चरीगतिः ।।७९३ ।।

लज्जा लज्जेति योषिद्भिः निर्लज्जस्सज्जते बली ।
यदि लज्जां विजानाति वेम! स्पृशति किं स्त्रियम्? ।।७९४ ।।

राजसस्त्रीपरो भूत्वा कथं विद्यादुरोः प्रथाम्? ।
विटलग्नाङ्गना वेम! विद्यात्किं पतिगौरवम् ।।७९५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

स्तौतीशो हार्दिकां पूजां यतचित्तो महान् भुवि ।
मनो विरहिता पूजा मृत्समा वेम! संशृणु ।।७९६ ।।

यत्र भक्तिश्शिवस्तत्र भक्तिहीनस्थले त्वघम् ।
भक्तियुक्तो नरो वेम! परमात्मेति कथ्यते ।।७९७ ।।

किं मृत्तिकोत्क्षेपणेन? धान्योत्क्षेपणतः फलम् ।
सतां किं वेम! लोपैस्स्यात्? परिग्राह्या हि तद्गुणाः ।।७९८ ।।

कल्यं भुक्त्वा मीलिताक्षो रुद्धकायोऽल्पसंयमी ।
आश्रित्य मेषगाम्भीर्यं प्रशंसां वेम! वाञ्छति ।।७९९ ।।

वेम! प्राप्तमिवाभाति न लभ्येत यथातथम् ।
पुनर्लब्धिः पुनर्नाशः यथा प्राप्तं दिशेच्छिवः ।।८०० ।।

स्वकर्मणा स्वयं लोके मातृगर्भोदितो नरः ।
आत्मानं वेम! विस्मृत्य देहात्मत्वेन नश्यति ।।८०१ ।।

त्यक्त्वा जन्माऽन्यजन्मानि ददतोः कर्मधर्मयोः ।
किं स्याद्गणनया? वेम! ताभ्यां मुक्तिः कथं भवेत् ।।८०२ ।।

सत्यवादी निर्मलस्स्यात् सत्यवादी हि नीतिमान् ।
असत्यवादी यो वेम! नीचचण्डाल एव सः ।।८०३ ।।

सम्मिश्रमम्बुक्षीरेण क्षीररूपेण राजते ।
सद्गुरोश्च तथा विद्वान् वेमैवं साधुसङ्गतिः ।।८०४ ।।

उत्कृष्टं मानुषं जन्म प्राप्तः पूर्वजनुर्व्यथाः ।
अजानन् वेम! पतति हानिं वृद्धिं न पश्यति ।।८०५ ।।

युवोक्तिभिः किं तपसि? विसृज्य खलचेष्टितम् ।
गुरुं प्रणम्य पदयोः वेमाशामाशु सन्त्यज ।।८०६ ।।

In Public domain. Digitization Muthulakshmi Research Academy

आत्मानात्मगतिं वेम! बोधयित्वा ततो गुरुः।
स्वस्वरूपं दर्शयते भ्रमरस्तु कृमेरिव।।८०७।।

आद्यौ गुरु स्तः पितरौ सद्गुरू पार्वती भवौ।
द्रोहो भृत्यर्थिनं वेम! गुरुरित्यभिभाषणम्।।८०८।।

दास्या रक्त्याख्यया बद्धस्ततो निष्क्रमणाक्षमः।
नरः प्रवर्तते वेम! तस्य मुक्तिः कुतो वद?।। ८०९।।

वितर्क्य मनसा मर्त्यस्सर्वं ज्यौतिषकल्पितम्।
इति मन्येत भाग्यं स्वं कियद्दैवं न वेत्ति किम्?।।८१०।।

तेजो याति घनं ज्ञानी सुखमेति न जायते।
आत्मैवात्मा तथाप्याहो! वेमात्मनि विराजते।।८११।।

ज्ञानिनं कर्मठाः वेम! प्रकृतिं त्यक्तुमक्षमाः।
प्राहुरुन्मादिनं तेन न दृष्टा प्रकृतिः कुतः।।८१२।।

जनिर्मृतिस्स्वप्नसुप्ती जगन्ति च भवन्ति हि।
मृगतृष्णेन तत्सङ्गः वेम! हास्याय नुर्भवेत्।।८१३।।

छायामिव तरुर्बोधं साधुर्दत्ते तदन्तिकम्।
गत्वा लभ्यो वेम! नोचेत् तद्गतं नागतं त्विदम्।।८१४।।

ज्ञात्वा भक्त्या छात्रधर्मं गुरुसेवारतो यदा।
तदैव सर्वमर्माणि ज्ञायन्ते वेम! नित्यशः।।८१५।।

नियम्य दुर्गुणान्सर्वान् यो वेम! परमं पदम्।
सम्यग्दर्शयते प्राप्य तं गुरुं मुक्तिमाप्नुहि।।८१६।।

गुरुं विना कथं मर्म वेत्त्यजस्तत्पितापि वा।
विना कुञ्चिकया वेम! कवाटविवृतिः कथम्।।८१७।।

In Public domain. Digitization Muthulakshmi Research Academy

आर्या वेदानधीत्यापि दर्पिता अधमां गतिम् ।
प्रापुर्वेम! महद्ब्रह्म वेत्तुर्जीवनमुत्तमम् ।।८१८ ।।

विमलां दृष्टिमालम्ब्य यदि न ज्ञानमाप्नुयात् ।
तमो नापैति तत्त्वज्ञो वेमापास्ततमा भुवि ।।८१९ ।।

त्रिषु पूर्वोत्तरगतिं चानभिज्ञा नरा स्ततः ।
नरकं यान्ति वेमैभ्यः त्रिभ्यस्त्वेकः नरः पुमान् ।।८२० ।।

पत्न्यामाशा भवेत्पत्युः पत्यौ पत्न्याश्च सा तथा ।
सदाशिवे भवेदाशा वेम! सिद्धस्य सर्वधा ।।८२१ ।।

नवनीतं घृतं तप्त्वा यदि न्यस्यत्यनातपे ।
दधीव घनतामेति वेमैवं स्थापयेन्मनः ।।८२२ ।।

एकोपायं शिवं वेत्तुं भूजनानां वदाम्यहम् ।
अचचञ्चलं मनः कृत्वा महिम्ना वेम! पश्यत ।।८२३ ।।

रज्जौ सर्पमतिं कृत्वा भयमेति ततो नरः ।
रज्जुं ज्ञात्वा त्यजेद्भीतिं वेमात्मा ब्रह्मनिर्भयः ।।८२४ ।।

जनने मरणे वेम! न स्वातन्त्र्यं पुरा नृणा ।
नानीतं न ततो नीतं मध्ये हास्याय कर्तृता ।।८२५ ।।

अजानतो महद्दूरं मार्गं स्याद्धि तथा स्थलम् ।
न दृश्यते वेम! दुर्गशिखरे निक्षिपेद्दृशम् ।।८२६ ।।

बाल्य एव भ्रमान् सर्वान् यदि वेम! न मुञ्चति ।
शुभं नाप्नोति मर्मज्ञो मा व्यधिष्ठा भृशं हृदि ।।८२७ ।।

बाल्ये नास्ति प्रभोर्भक्तिः शिवदृष्टि र्न यौवने ।
वार्धकेऽपि नरा वेम! न तं वर्णयितुं क्षमाः ।।८२८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

ब्रह्मज्ञा वयमित्याहुः वेम! प्रज्ञाश्च भूरिशः ।
कि ब्रह्म? कश्च तद्भावः को वर्णो ब्रूहि वेत्सि चेत् ।।८२९।।

ब्राह्मणा ब्रह्मसञ्जाता इति वेमाभिभाषणात् ।
प्रतिष्ठा ब्रह्मणो नष्टा ब्रह्मविद्ब्राह्मणः खलु ।। ८३० ।।

व्योम शून्यं वेम! तस्मिन् शब्दोऽजनि तदन्तरे ।
तद्ब्रह्मशब्दरहितं राजते सम्यगीक्षितम् ।।८३१ ।।

दारेषु पत्यौ पुत्रे च सर्वेष्वात्मा विराजते ।
सम्यग्वेम! प्रवर्तेत नानारूपैः पृथक् पृथक् ।।८३२ ।।

अगोचरं दृशां पापदूरं तं वेम! चेतसि ।
न्यस्य यो न भजेन्मुक्तिश्चिन्तालोस्तस्य नास्ति हि ।। ८३३ ।।

देहिनः पाशयोगेन हानिस्सञ्जायते खलु ।
ज्ञानदीपोत्कलिकया तं ज्ञात्वा वेम! वारयेत् ।।८३४ ।।

दूरे स्यात् दूरचिन्तानां तनौ दूरे विषज्जते ।
दैवं दूरीकृते जीवे वेम! देवो विराजते ।।८३५ ।।

ज्ञाननिष्ठापरो वेम! तनुं विस्मरतीह यः ।
न कामी स तु मोक्षार्थी भजाऽनिष्ठश्च निर्गुणम् ।।८३६ ।।

लोके नास्ति जले नास्ति वेदवेद्यमृतं पदम् ।
सगुणं निर्गुणं वेम! साधयित्वा विलोकय ।।८३७ ।।

अधीत्य सर्वविद्याश्च स्वानभिज्ञो विवेक्यपि ।
मूढो विद्यासु निर्विण्णो वेमोन्मत्तो विनश्यति ।।८३८ ।।

स्त्रियां प्रेम्णा मनो हृष्येत् तत्प्राप्तौ निस्सरेत् व्यथा ।
चिन्तां सदाशिवे भक्तिः न कुर्याद्वेम! जात्वपि ।।८३९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

कृत्वा कृत्वा सदा पूजां भवेद्वेमार्चकस्स्वयम् ।
पूज्यवस्तु स्वयं सर्वं स्वयं क्व कुरुतेऽर्चनाम् ।।८४० ।।

पुरारेर्वयनान्मुक्तिरूर्णनाभेर्बभूव हि ।
वयनेन कियांल्लाभः स्वभक्तिर्वेम! कारणम् ।।८४१ ।।

यदा चरन्तीन्द्रियाणि पञ्चभूतेषु सर्वधा ।
तदा जगद्भवेद्वेम! नोचेद्भाति जगत्कथम् ।।८४२ ।।

अतीत्य नियमं वेम! फालदुर्गं प्रविश्य च ।
निर्भयो ब्रह्मवित्तिष्ठेत् जयी मुक्तिमवाप्नुयात् ।।८४३ ।।

तारयेद्धि कृतं दानं विस्रब्धं वञ्चयेन्मनः ।
विस्रब्धा ज्ञानकलिका वेम! हन्ति विरोधिनः ।।८४४ ।।

वेम! तथ्यं पूर्णतत्त्वं मित्रं मिथ्या विमर्शिनः ।
सत्यं नित्यं च यत्कर्म तत्साक्षि ब्रह्म केवलम् ।। ८४५ ।।

प्रतिष्ठाप्य ध्वजं ब्रूहि वेमैको देव एव सः ।
तत्त्वतोऽन्तर्गतस्तिष्ठेत् पश्यन्तं तोषयेत्सदा ।।८४६ ।।

जीवः को वेति? किं वेम! विमृशन्ति नभोऽनिलम् ।
वह्निं सङ्गत्य देहीति कथ्यते देहभागिह ।। ८४७ ।।

जीवो जीवगुणोपेतो ब्रह्मसाम्यं लभेत किम्? ।
ग्रामसिंहश्च सिंहश्च कथं वेम! समौ भुवि ।।८४८ ।।

न वाञ्छन्ति परं मूढाः ये तेषां न स्थिरा मतिः ।
तदशक्यपरापेक्षा जुगुप्सा वेम! केवलम् ।।८४९ ।।

यद्यार्द्रता वेम! मूले हरितस्स्यात्सदा तरुः ।
दानाद्गृहे वसेज्जारा स्मृतौ स्याद्धरिरन्तिके ।।८५० ।।

In Public domain. Digitization Muthulakshmi Research Academy

अग्रे जीवागतिं ज्ञात्वा जीवात्मपरमात्मनोः।
वेमाघाब्धौ न मज्जन्ति किं मज्जेन्नाविकोऽम्बुधौ ।।८५१ ।।

वेम! ज्ञात्वा कालधर्ममुत्सृजन् कूटचेष्टितम्।
त्यक्तदारसुताद्याशः पश्य जागृत्य तं शिवम् ।।८५२ ।।

पत्रपूगसुधाद्रव्य त्रिवर्णैक्येन रक्तिमा।
भवेद्वेम! तथैवात्मा शोभेत त्रिगुणैर्युतः ।।८५३ ।।

ब्रह्माण्डं स्याद्वेम! देहं प्राणस्तु पवनस्तथा।
अक्षीण्यर्केन्दुशिखिनो ब्रह्मैतदितरं कुतः? ।।८५४ ।।

पृथिव्या नभसा वेम! जगद्व्याप्तं समन्ततः।
अवितुं के तु राजानः महीपाख्या नरस्य का ।।८५५ ।।

सुपक्वफलभोक्ता य श्शलाटोर्वेम! खादने।
नेहां स कुरुते तद्वत् नैहिके वर्तते यतिः ।।८५६ ।।

अन्तरिक्षे न गच्छे च्चेत् घनता कास्ति पक्षिणः।
यो व्यर्थाडम्बरो योगी स वेमैतादृशः खलु ।।८५७ ।।

स्मच्छन्नाग्निसङ्काशो वेम! यस्स्थिरभक्तिमान्।
तस्यायाति स्वयं मुक्तिः न लोकामोदकृज्जनः ।।८५८ ।।

नरो नारायणो वापि तत्त्वबद्धोऽपि वा भुवि।
वेमास्ति मरणं नूनमिति चेतसि विश्वसेत् ।।८५९ ।।

तरुण्यङ्गं पुमान्वेत्ति पुरुषाङ्गं तथाङ्गना।
वस्त्रधारणमात्रेण का लज्जा? वेम! का व्यथा? ।।८६१ ।।

फलं कलुषितं वेम! न साध्विति वदन्ति हि।
स्वकल्मषं न मन्यन्ते नात्मश्लाघी स्वदोषवित् ।।८६२ ।।

In Public domain. Digitization Muthulakshmi Research Academy

यदि कुर्याद्वृधार्भाटं हेयं स्यात्कूटयोगिनः ।
परं शून्यं तस्य वेम! भवेच्च नरकव्यथा ।।८६३ ।।

याते याते व्रजेत्काशीं प्रणवं च श्रुते श्रुते ।
दृष्टे दृष्टे वेम! सृष्टेः कारणं दृश्यते स्वयम् ।।८६४ ।।

प्रतिबिम्बो घटजले बिम्बो नास्ति जलास्थितौ ।
ज्योतिर्वेम! घटान्तस्स्थं क्रमशः पश्य निश्चलम् ।।८६५ ।।

सहस्रमेषीसङ्घाते वेमैकत्रस्थितेऽपि च ।
ज्ञात्वाम्बामेति तच्छाबो भक्तस्सद्योगिनं तथा ।।८६६ ।।

गुहाः प्रविश्य वेमेह! गुर्वन्वेषणकांक्षिणः ।
यदि क्रूरमृगाप्तिस्स्यात् मार्गं मुक्ते स्स दर्शयेत् ।।८६७ ।।

किं कस्तूरी सुगन्धेन? विना स्वमदसौरभम् ।
गजस्य योगहृष्टस्य रम्भया वेम! किं मुनेः ।।८६८ ।।

सस्यं रक्षेन्नरो वेम! यथोत्खात्य तृणादिकम् ।
तथा छित्वा दृश्यजालं मनो वर्धय निस्पृहः ।।८६९ ।।

प्राप्तानि सर्वसौख्यानि मिथ्यारूपाणि भावयन् ।
चरेद्भास्करवद्वेम! धीरस्सञ्चारकोविदः ।।८७० ।।

वेम! व्याघ्री प्रसूतापि हन्तुं शक्या प्रयत्नतः ।
वेत्तुं शक्यं मनोमर्म न तारकगतिस्तदा ।।८७१ ।।

यावच्चर्मघटस्थौ स्तः तावत्सक्तौ सती पती ।
विमुञ्चति घटं जीवे सम्बन्धो वेम! नश्यति ।।८७२ ।।

त्वग्भाति स्नेहसंलिप्ता व्यायामेन बलं तनोः ।
ज्ञानमार्गे परिज्ञाते स्याद्वेम! सफलं जनुः ।।८७३ ।।

In Public domain. Digitization Muthulakshmi Research Academy

खेचरास्तु न दृश्यन्त इति वेम! ब्रुवन्ति हि।
किमाद्रियन्ते? तान् दृष्ट्वा पित्राद्याः किं न तत्समाः ।।८७४।।

देहे स्थिते हि कामादीन् छित्वा ज्ञानपथाय च।
यतेत वेमालस्येन कायापाये तु किं फलम् ?।।८७५।।

योगिनोऽपि स्मरावस्था विस्पष्टा दृश्यते यदि।
नष्टयोगो भवेद्वेम! भ्रष्टत्वं प्राप्नुयात्तदा ।।८७६ ।।

वेमेषणत्रयं त्यक्तुमशक्तानां समन्ततः ।
नृणां मोहाब्धिमग्नानां कथं मोक्षसुखं भवेत्? ।। ८७७ ।।

वेमात्यल्पां शिवे भक्तिमकुर्वन् मोहपाशगः ।
फलमप्राप्य यः काशीं याति वेत्ति न किं यमः? ।।८७८ ।।

अलब्धतरणोपायो व्यर्थायासो नदीजलम् ।
कथं तरति? वेमैवमज्ञान्याप्नोति किं परम् ? ।।८७९ ।।

सुखं न प्राप वेमेह विस्रभ्य च परंततः ।
किं जीवनेन नादौ यत्सुखमन्ते कथं भवेत् ।।८८० ।।

इन्द्रलोकश्चेन्द्रजालं वेमेन्द्रपदवी तथा।
एतत्सर्वं समं भ्रान्त्या न पश्यन्ति नराः कलौ ।।८८१ ।

अस्थिरं देहमालोक्य वेम! दर्पसमन्वितः ।
सम्यक्संवर्ध्य दत्तेऽन्ते वह्नये वा शिवालये ।।८८२ ।।

क्षमावान् याति साधुत्वं नास्ति काऽपि क्षमा समा।
क्षमया वेम! कीर्तिस्स्यात् श्रेयांसि बहुलानि च ।।८८३ ।।

यस्य हस्ते काञ्चनाद्रिः निवासो रजिताचले।
सोऽपि वेमावशो भूमौ भिक्षार्थं व्यचरत् खलु ।।८८४ ।।

In Public domain. Digitization Muthulakshmi Research Academy

सुखानि वेम! सर्वाणि दुःखान्तानि तथैव च ।
पुण्यानि पापरूपाणि शूले चोरमनोरथाः ।।८८५ ।।

सत्येन साहसेनापि त्यक्त्वा मोहमतिं बुध ।
ज्ञात्वा मुक्तिं वेम! चित्ते गुरुं स्थाप्य प्रवर्तय ।। ८८६ ।।

सपत्नी जननी वेम! सदा रन्ध्रगवेषिणी ।
न स्वमातेव सहते ह्यभ्रान्तो ज्ञानमाप्नुहि ।।८८७ ।।

सक्त्या सम्यक्क्रिया लभ्या भक्त्या पूजा फलप्रदा ।
युक्त्या च सहितं वेम! वचनं राजते सदा ।।८८८ ।।

यो वेम! निर्जितश्वासः साधितुं शक्नुयात् फलम् ।
स मुक्तिं याति निर्मोहो दुर्गुणः किं न बाधते ।। ८८९ ।।

यस्तु धर्मान् वीरशैवान् वेत्ति स ब्रह्मवर्त्मनि ।
यदि तिष्ठेच्चरेद्वेम! सिंहो व्याघ्रभटो यथा ।। ८९० ।।

शिलायां शिलया वेम! घर्षितायां मुहुर्मुहुः ।
स्निग्धं यथा तथा कार्यकरणात् स्यात्प्रयोजनम् ।।८९१ ।।

न पौरुषं बलाद्वेम! बहिश्शत्रुविदारणम् ।
व्यथते ऽन्तर्मनो गेहे जित्वा वीथ्यां जयेत्खलु ।।८९२ ।।

सूर्योदयास्तं भावानां जातीनां मृत्युजन्मनाम् ।
संख्यां ज्ञात्वा वेम! योगी धीरस्सन् वर्तते सदा ।।८९३ ।।

मुहुर्दृष्टासु योषित्सु वेम! संसारितां व्रजेत् ।
सुतोदये व्यथा मीयात् भ्रष्टः कर्मेति रोदिति ।।८९४ ।।

मल्लिकामण्डपं वापीं वनं निर्माय कन्यया ।
रमेऽहमिति वेमैवं चिन्ततस्समयो गतः ।।८९५ ।।

In Public domain. Digitization Muthulakshmi Research Academy

मर्मानभिज्ञा वेमोर्व्यां कल्पयित्वा मतानि च।
शोचन्ति हि जना श्शेव भ्रान्तः काचकृते गृहे।। ८९६।।

वेमाशु चन्दने दृष्टे मनो हृष्यति गण्यते।
तद्वासना न जानन्ति स्वयं स्वाः पूर्ववासनाः।।८९७।।

वेमोशीनरघासस्य किं सुगन्धः प्रकल्पितः।
स्वस्मै हेम्नापराद्धं किं? ब्रह्मचेष्टा निरर्थिकाः।। ८९८।।

अभ्रगामी न लोकेऽस्ति न बलीयान् कलञ्जभुक्।
बकयोगैः किन्तु वेम! वाञ्छा नाशो भवेत्खलु।।८९९।।

नेत्राग्निना स्मरं दग्ध्वा पश्चाद्वेमातिकामुकः।
गौरीयुक्तोऽभवत्कर्म तमीशमपि सज्जते।।९००।।

प्राप्ता श्रीर्हरिणा वेम! विषः प्राप्तः पुरारिणा।
को विजानाति लोकोऽस्मिन् कन्यका प्राप्तिरित्यहो।।९०१।।

दैवानुकूल्ययुक्तं त्वां न शक्तास्साधितुं परे।
यदुक्तं भारते वेम! परमार्थमिदं हि तत्।।९०२।।

वेमैकस्मै धनं दत्वा परस्मै दातृता गुणे।
चित्तं दत्वा भ्रंशयते ब्रह्मचेष्टा निरर्थिकाः।। ९०३।।

उचितं दारुफलकं वस्तु कुर्वन्ति सुन्दरम्।
नोचेद्वेम! दहन्तीह कर्मिचेष्टास्तथा विधाः।।९०४।।

घृतं दध्नि तरुष्वग्निः वेम! पुष्पेषु सौरभम्।
तैलं तिलेषु च यथा चिदात्मा राजते तथा।।९०५।।

वेम! रामस्याभिषेकयत्नं दशरथोऽकरोत्।
जटा दधौ तदा रामः पृथक् चिन्ता पृथक्विधिः।।९०६।।

In Public domain. Digitization Muthulakshmi Research Academy

शुको भूत्वा शुकी गर्भे मुख्योऽभूद्वेम! मैनिषु।
चित्रवस्त्राणि जायन्ते न कार्पासफलेषु किम्? ।।९०७।।

साधुगोष्ठ्या विनश्यन्ति सर्वे नीचगुणा अपि।
न लोपो गन्धलेपेन दुर्गन्धो ह्रियते तनोः ।।९०८।।

कपटैर्यदि वर्तेत घनोऽपि विगुणो भवेत्।
पलाण्डुकवने वेम! मल्लिकेव प्रवर्धिता ।।९०९।।

बहुबीजा यथैधेत निशि पादहताप्यहो।
तथा वेम! परैर्धूर्तः विद्यात्किं गर्हितस्त्रपाम्? ।।९१०।।

क्षमाविहीनया वेम! भार्यया किं फलं भवेत्?।
किं जातेन कुपुत्रेण विद्यया किमवद्यया? ।।९११।।

खलाश्शपन्तीति वृथा वेम! खेदेन किं फलम्?।
तच्छापैर्नप्रथाऽपैति शापश्शपति सज्जने ।।९१२।।

दानादिषु नयेत्कालं श्वश्श्व इत्येव कष्टधीः।
किं स्याद्वेह स्वयं वेम! किं स्याद्वा स्वीयजीवनम् ।।९१३।।

सर्वलोकेऽस्ति यद्वस्तु माता शिशुगतं हि तत्।
निस्तरङ्गाब्धिसमया नियत्या वेम! पश्य तत् ।।९१४।।

यदीच्छति न वेमैति नापैति यदि नेच्छति।
प्राक्कर्मफलमित्येव न शोचेद्धि ततो हृदि ।।९१५।।

विद्याधिकाऽपि श्रोतव्या यदि कालो न गच्छति।
काकध्वनिं वल्लभाय स्त्री वेम! न शृणोति किम्? ।।९१६।।

अग्निज्वालासु ममतामभवे ध्यानमेव च।
निधाय ममता नाशे वेमार्चय सदाशिवम् ।।९१७।।

In Public domain. Digitization Muthulakshmi Research Academy

आशापाशैर्निबध्यन्ते सकला वेम! जन्तवः ।
ततो ज्ञानासिना ते हि छेत्तव्याः खलु सर्वशः ।।९१८ ।।

वदन् प्रगल्बवाक्यानि वेमागुरुरटन् भुवि ।
बध्वा कर्मसु बाधेत दन्तविष्टः कृमिर्यथा ।।९१९ ।।

वेम! ब्रह्ममयश्चेतो नियम्यानन्दकेलिषु ।
निधाय मुक्तिं लभते जीवो जिह्वारसैर्हतः ।।९२० ।।

द्यूतक्रीडा निर्जितस्य प्रविष्टस्य ततो वनम् ।
घनस्य पद्धतिं दृष्ट्वा वेम! वर्जय मूर्खताम् ।।९२१ ।।

इहोद्भूय जना वेम! ये विजानन्ति नेङ्गितम् ।
स्थावरा इति ते ज्ञेया न वाच्या जङ्गमा इति ।।९२२ ।।

अनया नोपयोगास्स्युः वेमेयं रिक्तभस्त्रिका ।
नश्येद्भ्रान्तश्चर्मभस्त्रै दुस्साध्यं खल्वसिव्रतम् ।।९२३ ।।

आत्मनाशमजानन्त ईहन्ते परनाशनम् ।
स्वेषां नाशकरं दैवं नास्ति किं? वेम! चिन्तया ।।९२४ ।।

कफरुद्धो मीलिताक्षो नष्टबुद्धिर्गतस्मृतिः ।
यदीह वर्तते वेम! साध्यं किं त्वद्गवेषणम् ।।९२५ ।।

इक्षुर्माधुर्यरहितो निस्सार इति कथ्यते ।
निर्गुणो निन्द्यते सूरिः वेम! दोषोऽस्तु दूरतः ।।९२६ ।।

किं श्रोत्रवत्ता सार्थक्यं? श्रोतव्या विब्रुधोक्तयः ।
श्रुते श्रुते वेम! सर्वं तवैव विशदं भवेत् ।।९२७ ।।

किं शिलाया दुकूलैश्च गोपुरैरालयैस्तथा ।
अपि कुम्भैर्वेम! वाञ्छेत् किमन्नाद्यखिलं च सा ।।९२८ ।।

In Public domain. Digitization Muthulakshmi Research Academy

मथिते मथिते वेम! वृक्षे सञ्जायतेऽनलः।
तथा दध्नि घृतं चैव तत्त्वं शुद्धं तनावपि ।।९२९ ।।

अपश्यतां वेम! मुक्तिं मूर्खाणां परमं पदम्।
सुव्यक्तं यो दर्शयते स बुधः किं न दैवतम् ।।९३० ।।

जनाश्श्रद्धा भक्तिहीनाः यतो वेम! भवन्त्यतः।
घनतायाः कलौ नैच्यं नैच्यस्य घनता भवेत् ।। ९३१ ।।

पापकर्म समाप्नोति वेमेह परदूषणात्।
परः परो न भवति परमात्मा हि केवलम् ।। ९३२ ।।

यथोचितेन वाक्यानि मोदन्ते सर्वसज्जनाः।
वेमाधिकानि वाक्यानि वृथायासफलानि हि ।।९३३ ।।

घासस्य शाकपाकान्ते न पृथक्करणं मतम्।
प्राग्वेमैव पृथक्कुर्यात् कुतो धर्मः स्थले गते? ।।९३४ ।।

गुणाभावे कुलं नष्टं स्त्रीदुर्गत्या त्रपा गता।
ऊषरक्षेत्रगं वेम! जलं भ्रष्टत्वमाप्नुयात् ।।९३५ ।।

अश्वमारुह्य रथ्यायां गच्छन्तं वेम! पूरुषम्।
भवन्ति पृष्ठतश्श्वानो घनं वीक्ष्य तथा खलाः ।।९३६ ।।

विज्ञाय फक्कीं प्रोक्तेन वाक्येनैकेन चाप्यलम्।
बहुप्रलापैः किं वेम! एकालं गतियुङ्नतिः ।।९३७ ।।

भवेदल्पो वाधिको वा वक्तव्यं कथितं मया।
विनाज्ञां वेम! देवस्य पत्रं चलति किं भुवि? ।।९३८ ।।

सिषेवे वेम काषायैः कङ्कुभट्टाख्यया पुरा।
विराटं धर्मजोऽज्ञेया गतयः कालकर्मयोः ।।९३९ ।।

In Public domain. Digitization Muthulakshmi Research Academy

नेन्धने दृश्यते वह्निर्यथात्मापि तनौ तथा।
मर्म ज्ञात्वा वेम! पश्चात् कुर्यात्तदवलम्बनम् ।।९४०।।

भूमौ ग्रहेषु सर्वेषु वेम! राशिचरिष्णुषु।
सदसत्फलानि दृश्यन्ते मन्यन्ते किं स्वपौरुषम् ।।९४१।।

दैवे ज्ञाने ते धर्मबुद्ध्या किं कुर्यादन्तकः प्रजाः।
धर्मः पृष्ठगतो वेम! सदा दैवायते खलु ।।९४२।।

वेम! राजतहैमाद्री यस्यस्तस्स विभुः कथम्?।
भिक्षार्थमचरत्सर्वं बलं दैवस्य नात्मनः ।।९४३।।

मानसाम्ब्वस्पृशन् हंसो यथा वेम! सदा चरेत्।
असक्तः कर्मसु चरेत् तथा भोगान्वितो यतिः ।।९४४।।

देहरूपे वेम! गेहे शत्रुमित्राणि तत्त्वतः।
अजानतः किं ज्ञानेन तद्धि सम्यक् कृतेऽमृतम् ।।९४५।।

वेम! धेनुस्तनाद्दुग्धे तप्ते पयसि तत्क्रमात्।
दधितक्राह्वयं चान्तः नवनीतं तथा परम् ।।९४६।।

नाज्ञातप्रणवो भक्तो नाज्योतिर्दर्शनो मुनिः।
न वेत्ति नित्यं यो वेम! निर्वाणी न भवेद्धि सः ।।९४७।।

आद्यन्तौ तत्त्वतो वेम! कौ स्यातां गुरुशिष्ययोः।
यदि न स्याद्गुरोश्शक्तिः को भेदो गुरुशिष्ययोः ।।९४८।।

सूत्रं धृत्वा गले वेम! शूद्रता निर्गतात्मनः।
इति भावस्तु मूढत्वं तेजस्वी स्याज्जितेन्द्रियः ।।९४९।।

वक्षोजौ वेम! कन्यायाः पुष्पगुच्छसमाविति।
वर्णयन्त्यलसा भ्रान्ताः किं स्यात्तन्मांसखण्डयोः ।।९५०।।

In Public domain. Digitization Muthulakshmi Research Academy

बाल्ये त्वं बहुधा वेम! यौ स्तनावपिबस्स्वयम् ।
तद्गतेन विमोहेन किं? मूढात्मन् विचिन्तय ।।९५१ ।।

प्राप्तुकामा विटं वीथ्यां दत्तचित्तेन कामिनी ।
अगुणस्सन् परं गन्तुं वेम! विद्वान् यतेत वै ।।९५२ ।।

यावज्जीवं रसं जिह्वा वाञ्छेद्वेमेह दम्पती ।
वाञ्छेतां पुत्रकथनं वाञ्छेत्सर्वान् हुताशनः ।।९५३ ।।

सर्वदो निस्तुलो दाता द्रोही सर्वापहारकः ।
गम्यं गमयते वेम! यस्स पूज्यो महान् गुरुः ।।९५४ ।।

पुराकृतं कर्मफलं भोक्तुमेषभवोऽभवत् ।
इत्याकृष्य मनो वेम! समदुःखसुखो भव ।।९५५ ।।

सागरेण समं किञ्चित् विद्यते वेम! नापरम् ।
नोपयोगाय तन्नीरं तादृङ्नीरेण किं फलम्? ।।९५६ ।।

साधनेन विना वेम! न किञ्चिदपि सिद्ध्यति ।
विद्या नास्ति विना बोधं विमृश्य हृदि चिन्तय ।।९५७ ।।

सज्जनान् यदि बाधेत कुलं नश्येद्दुरात्मनः ।
पूजा साधुजनानां स्यात् वेम! सायुज्यदायिनी ।।९५८ ।।

तारको धर्ममार्गस्स्यादिति देवा महर्षयः ।
वर्तन्ते वेम! नश्यन्ति तद्भिन्ना असुरादयः ।।९५९ ।।

पितरावात्मतनया भ्रातरो भृत्यबान्धवाः ।
यथा वेम! प्रवर्धन्ते तथाभ्युदयवान् भव ।।९६० ।।

विस्मरामीति वा वेम! भावयन् सुजनो हृदि ।
उचितां प्रत्युपकृतिं कुर्वन् प्राप्नोति गौरवम् ।।९६१ ।।

In Public domain. Digitization Muthulakshmi Research Academy

वेमार्हसमये कार्यं सहसा यदि कुर्वते।
विषमं स्याद्धि गोतुम्ब शलाटुग्रहणं यथा ।।९६२ ।।

नास्तीत्यकथयन् वेम! निषेधमपि चाब्रुवन्।
अशोचन् हृदि नात्मीयमिति दानं वदान्यता ।।९६३ ।।

कामचिन्तावशो वेम! मदान्धस्त्वं न पश्यसि।
निष्ठां च नियतिं त्यक्त्वा तमश्छित्वा परं व्रज ।।९६४ ।।

फलाभिरहितं कार्यं कर्तुं नेच्छन्ति मानवाः।
यदि साधु फलं वेम! परे मुदमवाप्नुयात्।।९६५ ।।

अन्यचिन्ता व्यथा ज्ञात्वा जतुकस्पर्शवत् जगत्।
विस्मृत्य वेम! सम्यक्त्वमात्माराम स्सदा भव ।।९६६ ।।

गुरौ प्राप्ते त्वात्मविद्यां जानामीति वृथा जडः।
कालं नयति वेमैतदन्तरे प्रपतेत्तनुः ।।९६७ ।।

काशीगयाप्रयागांश्च काञ्चीं च मधुरां तथा।
सेतुं वीक्ष्यापि वेमेह विष्टितुल्या ह्यसंस्कृतिः ।।९६८ ।।

असमीचीनविद्वेम! भोगवाञ्छापरो नरः।
द्रोहात् परान् दूषयितुं यतमानो विनश्यति ।।९६९ ।।

आर्भटी वेम! नास्तीति चाजानन् ज्ञानिनं नरः।
दाम्भिकस्य वशो भूत्वा तदन्ते प्राप्नुयाच्छ्रमम्।।९७० ।।

ज्ञातायां वेम! चापत्तौ तां वारयितुमिच्छति।
नरः कथंचित् संश्रृण्वन् न वेत्ति नरकव्यथाम्।।९७१ ।।

स्त्रीरूपं कामुका वीक्ष्य कामाग्नौ निपतन्ति हि।
सन्ततं वेम! सम्मोहः करोति बहुधा रतिम्।।९७२ ।।

In Public domain. Digitization Muthulakshmi Research Academy

ससर्जाहो! स्त्रियं ब्रह्मा महाभूतसमां नृणाम्।
यो वेम! नारीमायायां न पतेत्स न दृश्यते ।।९७३।।

स्त्री पुंशुक्लात् गर्भिणी स्यात् आक्षीबेन रसं तथा।
यदि वेम! ज्ञानयुक्ता बुद्धिर्धत्ते न किं जगत्? ।।९७४।।

वेमानधीतविद्यानां न सौख्यानि भवन्ति हि।
अधीतविद्यस्सरसो विद्यावान् भव मर्मवित् ।।९७५।।

स्थानवेत्तानुकूल्येन कथं चित्प्राप्नुयात् पदम्।
वेम! भावानभिज्ञो हि कथं वेत्ति परं जनः? ।।९७६।।

अजानन्तो वेम! मर्ममत्तचित्ता निरन्तरम्।
नश्यन्ति चित्तचापल्यादभक्तो वेत्ति किं परम्? ।।९७७।।

स्त्रीसञ्ज्ञाय सुतोत्पत्त्यै व्यथते वेम! मानवः।
उन्मादस्तु महांस्तस्य धत्ते शिरसि भूशिलाम् ।।९७८।।

यदि ध्यायेद्धृदि शिवं न हानिस्तस्य विद्यते।
परं सिद्ध्यति वेमेह धृतनिष्ठस्सुखी भव ।।९७९।।

पराभ्युदयमुद्वीक्ष्य सर्वदा वेम! काकवत्।
अधमो निष्ठुरोक्तिस्स्यात् मृत्तुल्यं तस्य जीवनम् ।।९८०।।

बाल्यात्प्रभृति यत्कर्म कृतं तत् बालवृद्धयोः।
प्रयाति वृद्धिं वेमेदं रोदस्यां पश्य धीरधीः ।।९८१।।

वेम! गन्धबिडालस्य चक्रे किं गन्धसौरभम्?।
किं तन्महत्त्वं मेदिन्यां ब्रह्मचेष्टा निरर्थिकाः ।।९८२।।

वेमाहमिति यद्वाक्यं तद्धि त्वमिति चोच्यते।
अहं त्वं चेति निष्ठातः अहं त्वं त्वमहं ध्रुवम् ।।९८३।।

In Public domain. Digitization Muthulakshmi Research Academy

चित्रदीपसमां चिन्तां व्युदस्य विमलं मनः।
मित्रं कृत्वा दुर्गुणानां मुक्तिर्वेम निवारणम् ॥९८४॥

सूक्ष्मं वेमाचलं तत्त्वमनुभूत्येकवेदितम्।
वक्तुं दर्शयितुं चापि न शक्यं द्योतते हृदि॥ ९८५॥

अदृष्ट्वा प्राणिषु शिवं योग इत्येव योगिनः।
कथयध्वे यथा भोगे किं योगेऽस्ति तथा शिवः॥९८६॥

लक्ष्यं कृत्वा नासिकाग्रे सम्यग्दृष्टे वशं भवेत्।
काशीं काञ्चीं च सन्द्रष्टुं वेम! किं निष्फलश्रमैः॥९८७॥

वेम! कुक्षिम्भरित्वाय दोर्बलं वंशवर्तिनः।
तदेव योगिनो लभ्यं चेद्दिव्यानन्ददायकम्॥९८८॥

प्रतिष्ठाप्य ध्वजान् वेम! विक्रमाढ्यो महीतलम्।
शासेत चेन्नास्ति मुक्तिः यतस्व विमलाध्वने॥९८९॥

वेम! कूटवचांस्युक्त्वा यदि भेदं करिष्यसि।
तत्वं न ज्ञायते सम्यक् ज्ञानसारं विनाऽव्ययम्॥९९०॥

हृज्जातं गुणसञ्जातं छित्वा यत्नेन निस्पृहः।
बुद्धिं विशुद्धं कुर्याच्चेत् वेम! सा मुक्तिरेव हि॥९९१॥

नादमेव श्रवो जातमाकाशो वेम! कथ्यते।
नेत्रदृष्टा कलाज्वाला नासावायुश्च मुक्तिदः॥९९२॥

भानुस्सोम कुजस्सौम्यो गुरुश्शुक्रशनिः क्रमात्।
दिव्यसंज्ञाकरा वेम! दिवसन्त्वेकरूपकम्॥९९३॥

दक्षे वेमाश्विके प्राप्ते गुणीसन् वर्तते हयः।
स्वकीयदेहस्य गुणं न जानाति कुतो हयः॥९९४॥

In Public domain. Digitization Muthulakshmi Research Academy

स्थातुं शक्यस्तरावग्निरग्नौ तु न तथा तरुः ।
धृतवृक्षाग्निमर्यादस्संसारी वेम! सञ्चरेत् ।। ९९५ ।।

आच्छादयति वेमार्कं मेघरोधस्तथा स्थिरम् ।
चित्तावरोध स्संरोधो महिमानं च विस्मृतेः ।।९९६ ।।

बिम्बस्थाचेत् स्थिरा दृष्टिः मग्नास्यान्मनवे स्मृतिः ।
लग्नं चित्तं परे लक्ष्ये वेम! रक्षति सर्वदा ।।९९७ ।।

वेमप्रोक्तानि पद्यानि ददत्यर्थं सहस्रधा ।
दर्शं दर्शं लेभेतात्र वेम! ज्ञानं महाद्भुतम् ।।९९८ ।।

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy
ISBN 978-93-80171-17-3

संस्कृत अकाडमी
राष्ट्रियसंस्कृतसंस्थानेन मानिता आदर्शशोधसंस्था
उस्मानिया विश्वविद्यालयः, हैदराबाद्
2010